RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

॥ ओ३म् ॥

बहूनां चैव सत्त्वानां
समवायो रिपुञ्जयः।
वर्षधाराधरो
मेघस्तृणैरपि निवार्यते।।

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत-संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

धमोऽऽख्याने श्मशाने
च रोगिणां या मतिर्भवेत्।
सा सर्वदैव तिष्ठेच्चेत्
को न मुच्येत बन्धनात्।।

( चाणक्य-नीति )

卐 वर्षम्-७ 卐 अंकः-१६ ( १५८ ) 卐 १६ फरवरीमासः २०१८ तः २८ फरवरीमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७४ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## स्वामी रामदेवः योगं जनआन्दोलनस्य स्वरूपं दत्तवान-अरुणजेटली

नवदेहली। बाबारामदेवस्य जीवने आधारित धारावाहिक 'स्वामीरामदेव-एक संघर्ष' इत्यस्य छत्रशाल क्रीडांगने चलचित्रप्रकरणे सम्पन्नमभवत्। अस्मिन्नवसरे सहस्त्र जनैः सह



केन्द्रियवित्तमंत्री अरूणजेटली, केन्द्रियकानूनमंत्री श्रीरविशंकर प्रसाद, डॉ. हर्षवर्धन एवं भाजपायाः राष्ट्रियअध्यक्ष अमितशाह अपि उपस्थिताः आसन्। कार्यक्रमस्य शुभारम्भः यज्ञ व योगमाध्यमेन अभवत्।

अस्मिन्नवसरे वित्तमंत्री अरूणजेटली उक्तवान यत् स्वामि रामदेवः एकं आन्दोलनस्य रुपे स्थापितवान्। देशस्य इयं महान परम्परां प्रत्येकस्मिन क्षेत्रे प्रसारणस्य कार्य कृतवान। ते योग गुरुणा सह सामाजिककार्यकर्तायाः रूपे अपि कार्य कृतवन्तः। समाजे भ्रष्टाचारस्य विरूद्ध ते एकं जनआन्दोलनं स्थापितवान। भाजपायाः राष्ट्रियअध्यक्ष अमितशाह उक्तवान यत् स्वामीरामदेवः स्वल्प जीवने मृतपाय योगविचारारा पुनर्जीवनं दत्तवान। बाब मध्ये गुरूकुलस्य प्राचीन धरोहरं अपि अग्रे आनीतवान। कानूनमंत्री रविशंकरप्रसाद उक्तवान यत् बाबा रामदेव अस्य देशस्य संस्कार, संस्कृति व आन्तरिक उर्जा जाग्रितं करणाय एवं तं सम्पूर्ण विश्वे स्थापनस्य कार्ययकरोत्।

## साहित्य-अकादम्याः छह दिवसीय साहित्योत्सवः

नवदेहली। साहित्यअकादमी माध्यमेन प्रतिवर्ष आयोजित साहित्योत्सवस्य शुभारम्भः प्रख्यात हिन्दी कथाकार एवं विद्रषि चित्रामुदगल माध्यमेन सम्पूर्णवर्षस्य गतिविधिनां प्रदर्शन्याः



उद्घाटनेन् अभवत्। रविन्द्र परिसरे सम्पन्न अस्मिन कार्यक्रमे श्रीमतीमुद्गल उक्तवती यत् अयं साहित्योत्सवः विश्वस्य सर्वाधि क वृहद् प्रजातांत्रिक देशस्यास्ति। कोऽपि साहित्यकारः देश एवं समाजस्य सरोकारेन अनभिज्ञो न भवति। सरोकारी लेखक निर्मातुं साहित्यकारान् स्व स्वार्थ तिलाञ्जलि देयम्।

अस्मिन साहित्योत्सवे सम्पूर्ण देशस्य प्रायसः 250 लेखक एवं विद्वान्सः भागं गृहीतवन्तः। सायंकालिन सत्रे कमानीसभागरे साहित्यअकादमी माध्यमेन पुरस्कार वितरणस्य कार्यक्रममभवत् येषु 23 भारतीयभाषायाः 2017 वर्षस्य विजेतां नवनिर्वाचित अध्यक्ष चन्द्रशेखरायः दत्तवान। पुरस्कार समारोहस्य मुख्यातिथि प्रख्यात लेखक किरण-नागरकर आसीत्। पुरस्कृत लेखकान् अंगवस्त्र, ताम्रफलक एवं एक लक्ष्य द्रव्यस्य वस्त्र दत्तवान्। अस्मिन्नवसरे मुख्यातिथि किरणनागरकर उक्तवान यत् रचनात्मकतायाः केन्द्रिय तत्व संवेदना अस्ति। एवं विचार माध्ययेन शब्देषु संवेदना जागृतो भवति ते सर्व पुरस्कार विजेतारं शुभकामना दत्तवन्तः। कार्यक्रमस्य अध्यक्षता समये चन्द्रशेखरकंवार उक्तवान यत् विभिन्न क्षेत्रिय भाषाषु रचितसाहित्य देशस्य विरासतोऽस्ति। पुरस्कार अर्पन समारोहस्य पश्चात् भागवतमेलन माध्यमेन कुचिपुरी नृत्य प्रस्तौतम्। पुर्व अध्यक्ष विश्वनाथतिवारी नवयुक्त अध्यक्ष एवं उपाध्यक्षं शुभकामना दत्तवान।

## प्रत्येकस्मिन् साहित्ये जन एवं आन्दोलनस्य अहं भूमिका भवति-प्रो.रामदरशमिश्र

दिल्ली। राजौरीगार्डन स्थित राजधानीमहाविद्यालय एवं राष्ट्रियसिंधी भाषाविकास परिषदस्य संयुक्ततत्वाधाने जनआन्दोलन एवं भारतीयसाहित्यहिन्दी एवं सिंधी एताषां विशेष सन्दर्भे, विषये द्वी दिवसीय संगोष्ठी अभवत्।

अस्य समापन सत्रस्य अध्यक्षता समये वरिष्ठसाहित्यकार




एवं साहित्यअकादमीतः सम्मानित प्रो. रामदरशमिश्रः जनआन्दोलनस्य साहित्य, समाज व संस्कृतिः निकट सम्बन्ध विषये उक्तवान यत् केवल जनआन्दोलनेन साक्षात् युक्त साहित्य एव न अपितु प्रत्येकस्मिन साहित्ये जन एवं आन्दोलनस्य अहंभूमिका भवति।

छायावाद सदृश साहित्ययुगोऽपि एक प्रकारेण जनआन्दोलनेन सह युक्तोऽस्ति। यस्य पुनर्पाठस्य आवश्यकताऽस्ति। केवल कथनम् एव नास्ति अपितु साहित्यस्य कस्यापि पक्षं जन एवं आन्दोलनतः पृथक् अवगन्तुं न शक्यते। वास्तवे साहित्यस्य मूल प्रकृत्या जनआन्दोलनस्यापि समावेशोऽस्ति।

राष्ट्रिसिंधी भाषाविकासपरिषदस्य निदेशक रविप्रकाश टेकचंदानी सिंधी भाषायै जनआन्दोलने प्रकाशं दत्वा उक्तवान् यत् भारतीयपरिवेश एवं साहित्यं जनआन्दोलनस्य विशेष सन्दर्भे अध्ययनस्य आवश्यकताऽस्ति दिल्लीविश्वविद्यालयेन युक्त प्रो. चंदनचौबे कस्यापि आन्दोलनस्य मुख्योधेश्यं जीवनमूल्यानां स्थापना उक्तवान। कार्यक्रमस्यान्ते महाविद्यालयस्य प्राचार्य डॉ. राजेशगिरि धन्यवादं ज्ञापितवान।

## चन्द्रशेखरकंबारः साहित्यअकादम्याः नवाध्यक्ष रुपे चयनितः

नवदेहली। प्रसिद्ध कन्नड लेखक चन्द्रशेखर कंवार साहित्यअकादम्याः नवाध्यक्ष रुपे चयनितो जातः। अनयाः पदाय प्रथमे गुप्तरूपेण मतदानमभवत्।



अध्यक्ष पदाय कंवारं 89 मते 56 मत प्राप्तवान एवं लेखिका प्रतिमाराय 28 मतं प्राप्य द्वितीय स्थाने अस्ति। अध्यक्ष पदे माध्वकौशिक व भाषासंयोजक चितरंजनमिश्र निर्वाचितो अभवत्। साहित्यअकादम्याः नवनिर्वाचित अध्यक्ष चन्द्रशेखरकंवारः कन्नडभाषायाः प्रसिद्ध कवि एवं साहित्यकारोऽस्ति। ते कन्नडभाषायां निर्मित चलचित्रस्य निर्देशनमपि अकुर्वन। कंवारः 1991 तः 2000 पर्यन्तं राष्ट्रिय नाट्यविद्यालयसमाजस्य अध्यक्ष अपि आसीत्।

# वाचिक, जनजातीय साहित्य संगोष्ठी एवं आदिवासी कवि सम्मेलनम्

नवदेहली। साहित्यअकादम्याः साहित्योत्सवस्य द्वितीयादिवसे वाचिक एवं जनजातीय साहित्ये संगोष्ठ्याः आयोजनमकरोत्। अस्य सत्रस्य उद्घाटन वक्तव्य लब्धप्रतिष्ठित विद्वान् मृणालगिरि कृतवान। अस्य सत्रस्य अध्यक्षता प्रख्यात भाषावैज्ञानिक एवं भारतीयसामाजिकविज्ञान अनुसन्धानपरिषदस्य अध्यक्ष वी.वी.कुमार.कृतवान। संगोष्ठयां विषये वीज वक्तव्य इन्द्रिरागाँधी




राष्ट्रिजनजातीय विश्वविद्यालयस्य कुलपति प्रो.टी.वी. कट्मीमनी दत्तवती। संगोष्ठ्याः आरम्भे साहित्यअकादम्याः सचिव डॉ. के निवासराव स्वागत वक्तस्य समये उक्तवान यत् संसारस्य कोऽपि देशः भारतस्य भाषायी विविधतायाः साक्षात्कारं न कर्तुं शक्यते। युवावर्ग स्व समृद्ध परम्परायाः ज्ञानं भवेत् एतदर्थ तां संरक्षित संपोषित एवं प्रोत्साहणस्य आवश्यकताऽस्ति। मुख्यातिथि मृणालगिरि उक्तवान सर्वाषां भाषाणां स्व स्वायत्ता भवति एवं सर्वाः भाषा पुर्ण रूपेण शुद्धो भवति। तां अनुवादस्य माध्यमेन अनया शुद्धतया प्रस्तौतुं न शक्यते।

अग्रिम विचारसत्रस्य अध्यक्षता सामाजिक चिंतक एवं विद्वान डेजमंड स्वार्मावफलाड कृतवती एवं अस्मिन् सत्रे डी कोली, जोथोनछिगि खियाडटे एवं ओमप्रकाशभारती स्व गम्भीर लेख प्रस्तुतवन्तः। द्वितीयसत्र आदिवासीकविसम्मेलनस्य आसीत् येषु अर्जुनसिंहध्रुवे (वैगा), राजकिशोरनायक (वाथुडी), कुलदीपसिंहबम्पल (भोटिया), सुदर्शनभौमिज (भूमिज), कुलीनपटेल (घोडीआ), कोलनट बी मरक (गारो), रफीक अन्जुम (गोजरी), रुपसिंहखुश्राम (गौड़ी), वीराराठौर (गोरमती), रुद्रनारायणपाणिग्रहि (हल्बी), कैरासिंहवांदिया (हो), ऑनतेरान (कार्वी), कलाचन्दमहालि (महाली), तथा मिनिमेनलालु (खासी), स्व रचनां प्रस्तुतवन्तः अस्य सत्रस्य संचालनं देवेन्द्रकुमारदेवेशः कृतवान।

# लेखक सम्मेलने वैविध्यपूर्ण रचना संसारस्य प्रस्तुति

नवदेहली। साहित्यअकादमी पुरस्कार 2017 तत्र पुरस्कृत लेखकाः स्व रचना प्रक्रियां लेखकसम्मेलने पाठकानां समक्षे प्रस्तुतवन्तः। हिन्दीभाषया पुरस्कृत रमेशकुंतलमेघ उक्तवान यत् सम्पूर्ण विश्वस्य मिथकेषु अद्भुत समानता प्राप्यते। उर्दू भाषया पुरस्कृत मोहम्मदवेगअहसास कृष्णचन्दरं रेखंकित कृत्वा उक्तवान् यत् अधिक लेखनमपि रचनात्मकता हेतु हानिकारकोऽस्ति। असमिया लेखक जयंतमाधववरा




मानवतायाः रचनात्मकतायाः श्रोत उक्तवान। वांग्ला लेखक आफसारआमेद उक्तवान यत् कथायां कल्पनाशक्तेः माध्यमेन दिन-प्रतिदिनस्य समस्यां दूरीकतुं शक्यते। वोडो इत्यस्य पुरस्कृत लेखिका रीतावर स्व पुरस्कृत कृति ''थैसाम'' इत्यस्य उल्लेखं कृत्वा सामाजिक रीति-परम्परायां कटाक्ष कृतवान। ''डोगरी'' अनया पुरस्कृत शिवमेहता विभाजनस्य विभिषिकायाः उल्लेखः कृतवान। एवमेव आंग्लभाषया मंमगदई, गुजरातिभाषायाः लेखिका उर्मिघनश्यामदेसाई, कन्नड के.टी.पी.अशोक, कश्मीरी इत्यस्य अवतारकृष्णरहवर, कोंकणी इत्यस्य गजाननरघुनाथजोग, मैथिलि इत्यस्य उदयनारायणसिंह ''नचिकेता'', मलयालम इत्यस्य के.पी.रामानुन्नी, मराठि इत्यस्य श्रीकान्तदेशमुख, नेपाली इत्यस्य वीणाहाडगाफिम, गायत्रीशराफ (ओड़ीया), जगदीशलछाणी (सिन्धी), टी.देवप्रिया (तेलुगु) नछत्तरसिंह (पंजाबी), नीरजदईया (राजस्थानी), संस्कृतस्य निरंजनमिश्र, भुजंगटुडू (संताली) स्व रचनायाः विवरणं दत्वा स्वीयं विचारं व्यक्तवन्तः।

अन्ते कार्यक्रमस्य अध्यक्षता समये साहित्यअकादम्याः उपाध्यक्ष माधवकौशिक सर्वान पुरस्कृत लेखकान् धन्यवाद दत्तवान्।

# भारतीय इजरायली लेखक सम्मेलनम्

नवदेहली। साहित्यअकादमी साहित्योत्सवस्य अवसरे अकादमी स्थित सभाकक्षे भारतीय इजरायली लेखक सम्मेलनस्य आयोजनमभवत्। भारत एवं इजरायलस्य मध्ये राजनैतिक सम्बन्धनां 25 वर्ष पूर्णावसरे इयं विशेष कार्यक्रमं सम्पन्नमभवत्, येषु इजराइली हिब्रु साहित्यकारः




सहभागिता दत्तवान। कार्यक्रमस्य आरम्भे साहित्यअकादम्याः सचिव डॉ. के.श्रीनिवासराव इजरायली लेखक दलस्य स्वागत समये उक्तवान यत् भारत एवं इजरायलस्य मध्ये व्यापारिक एवं सांस्कृतिक सम्बन्ध 1000ई.पु.तः अस्ति। द्वयोः देशस्य प्राचीन एवं समृद्ध विरासतोऽस्ति। कार्यक्रमे श्रीमेयरकौजिएल इजरायलस्य हिब्रु लेखकसंघस्य अध्यक्ष तात्विकानीरस्य संदेशः पठित्वा श्रावितवती। तदुपरान्त इजराइली लेखकः स्व विचारं व्यक्तवान भारतीय भाषाणां लेखकाः तत्रत्याः भाषा, साहित्य एवं संस्कृतेः विषये जिज्ञासा व्यक्तवन्तः यस्य यथोचित समाधानं हिब्रु लेखकाः दत्तवन्तः। कार्यक्रमस्य समापनं धन्यवादज्ञापने अभवत्।

# मिडिया एवं साहित्ये परिसंवादस्यायोजनम्

नवदेहली। साहित्य अकादमी माध्यमेन प्रचल्यमान साहित्योत्सवस्य तृतीय दिवसे मिडिया एवं साहित्यस्य सम्बन्धोपरि चर्चा करणार्थ विशेष परिसंवादस्यायोजनभवत्। यस्योद्घाटन प्रसारभारत्या




अध्यक्ष ए.सूर्यप्रकाशः कृतवान। ते उक्तवन्तः यत् वर्तमानसमये मिडिया बहुआयामि अभवत्। प्रायसः सर्वेषु समाचारपत्र, पत्रिका एवं प्रसारसाधनेषु लोकप्रिय संस्कृति प्रोत्साहनस्य कार्यं भवति। व्यवसायिकताया अन्तर्गत मिडिया मध्ये साहित्यस्य स्थानं प्रायसः लुप्तो जातः नूतन पीढी स्व भाषा एवं संस्कृति माध्यमेन-विमुखो भवति। अयं एकः चिन्तायाः विषयोऽस्ति। साहित्यअकादम्याः सचिव डॉ.के.निवासराव उक्तवान यत् वर्तमान मीडिया मध्ये विश्वस्य श्रेष्ठसाहित्य स्व स्थानं कथं संरक्षयितुं शक्यते अयं विचारणीय विषयोऽस्ति।

द्वितीयसत्रस्य अध्यक्षता सच्चिद्दानदजोगी कृतवान। सुधीशपचौरी, राहुलदेव, राजीवरंजननागः हिन्दीमीडिया एवं साहित्ये चर्चा कृतवान। राहुलदेवः वर्तमान मीडिया मध्ये भाषायाः स्थित्योपरि चिन्ता व्यक्त कृत्वा उक्तवान यत् अनया सर्वाधिक हानि मातृभाषाः भवति। कार्यक्रमस्य अग्रिमसत्रस्य अध्यक्षता वरिष्ठपत्रकार एवं राष्ट्रिपुस्तकन्यास्य अध्यक्ष वसदेवभाई शर्मा कृतवान। ते उक्तवन्तः यत् मीडिया स्व सार्थक दिशाबोध अपि अवधानं दाष्युत्। अस्मिन्नवसरे साहिदलतिफ, देवप्रकाश, रविन्द्रत्रिपाठी, अनन्त विजय, वालेन्दुदधीचि अपि स्व विचारं व्यक्तवन्तः।

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# भारतस्य स्वाधीनताया 70 वर्षः साहित्ये चित्रण विषये राष्ट्रियसंगोष्ठी

नवदेहली। साहित्यआकादमी साहित्योत्सवस्य चतुर्थदिने भारतस्य स्वाधीनतायाः 70वर्ष साहित्ये चित्रण विषये त्रिदिवसीय राष्ट्रियसंगोष्ठ्या आयोजनमभवत्। उद्घाटन वक्तव्ये




साहित्यअकादम्याः महत्तरसदस्य मनोजदास उक्तवान यत् स्वतन्त्रता समये राष्ट्रवादी भावना प्रखर आसीत् एवं इयं देशस्य सर्वाषु भाषाषु अभिव्यक्त आसीत्। अयं लेखकस्य बहुशाखा विद्यमानोस्ति। अध्यक्षीयभाषणे अकादम्या अध्यक्ष चन्द्रशेखरकंवर उक्तवान यत् अस्माकं साहित्यकारः




लोकसाहित्यं इतिहास एवं भविष्यस्य संभावना सदृश विधाभिः सह संयुक्त कृतवान।

संगोष्ठया अग्रिम सत्रे दलितासाहित्य एवं स्वाधीनतायाः शुद्धिकरण एकतारूप साहित्य विषये रघुवीरचौधरी महोदस्य अध्यक्षतायां शरणकुमारलिम्वाले श्योराजसिंहवैचने इत्यादि स्व विचारं वयक्तवान। युवासाहित्य नूतनफसलकार्यक्रमे लेखकाः स्व रचना प्रस्तुतवन्तः। अन्तिमसत्र कवितापाठेन सुसम्पन्नो जातः। एषु हिन्दी, उर्दू भाषायाः लोकप्रियकवि आसोकश्रीवास्तव, अशोकचक्रधर, बुद्धिनाथमिश्र, चन्द्रमानखयाल, कुँआरवैचेन, लक्ष्मीशंकरवाजपेयी, मधुमोहिनीउपाध्याय, माहेश्वरतिवारी इत्यादि स्वकविता एवं गजल श्रावयित्वा मंत्रमुग्ध कृतवन्तः।

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल ( रेडीमेड ) ✪ रेशम साड़ी ( रिल्ड ) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, ( उ० प्र० )
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोनः-0120-2631855, 9899334204

# वसंतोत्सवस्य विशेषस्थानमस्ति भारतीय साहित्ये-सुश्री आनन्दा हिमानी

नवदेहली। संस्कृतभाषा एवं साहित्ये उल्लेखित ज्ञान-विज्ञानस्य कारणेन भारतं विश्वगुरु मन्यन्ते। वैदिककाल ए वं वेदांगकालस्य साहित्यस्याधारे ज्ञान-विज्ञानं, संस्कृति-संस्काराणां सम्पन्नतायां भारतस्यातिरिक्त कोऽपि देशः नसीत्। विश्वे भारतेव एकं एतादृशः देशोऽस्ति येषु षड्ऋतुनामुल्लेखोऽस्ति वसंतऋतु इत्यस्य वर्णनं साहित्ये सर्वोपरिवर्तते। विचारोऽयं स्वीडनदेशस्य




संस्कृतप्रचारिका सुश्रीआनन्दा हिमानी दिल्लीसंस्कृतअकादमी माध्यमेन आयोजित वसंतोत्सव कार्यक्रमे मुख्यातिथि रूपे उक्तवती। अस्मिन्नवसरे अकादम्या उपाध्यक्षा डॉ. कान्ताभाटिया




उक्तवती यत् अस्माकं देशे नालन्दा तक्षशिला एवं विक्रमशिला आदि विद्यालयेषु देश-विदेशस्य छात्रः शिक्षा ग्रहणं करोति स्म। सचिव जीतरामभट्ट उक्तवान यत् वसन्तऋतोः आगमनेन पर्यावरणे नविनता आगच्छति।

अस्मिन्नवसरे गणेशनाट्यशालायाः संचालिका पद्मश्री सरोजवैद्यनाथस्य छात्राणां माध्यमेन विभिन्न संस्कृत श्लोकेषु भरतनाट्यस्य प्रस्तुती कृतवती।

# संस्कारस्य माध्यमोऽस्ति भाषा-प्रो. शारदा शर्मा

नवदेहली। देशभक्त एवं विलक्षण प्रतिभा निर्माणे संस्कृतभाषायाः महत्वपूर्ण योगदानमास्ति। भाषा एतादृशी माध्यमोऽस्ति या मनुष्यं संस्कारयति। संस्कृतभाषा संस्काराणां उत्पादनं करोति अतः अस्मान् दैनिक जीवने संस्कृतभाषायाः प्रयोगः कर्तव्यः। विचारोऽयं दिल्लीविश्वविद्यालयस्य



संस्कृतविभागस्य अध्यक्षा प्रो. शारदाशर्मा दिल्ली संस्कृतअकादमी माध्यमेन आयोजित हिन्दुमहाविद्यालये ''संस्कृत प्रश्नमंच प्रतियोगिता समारोहे'' उक्वती। कार्यक्रमस्य अध्यक्षता समये हिन्दुमहाविद्यालयस्य प्राचार्या डॉ अंजुश्रीवास्तव उक्वती यत् संस्कृतस्य प्रचार माध्यमेन अस्माकं संस्कृति एवं प्राचीन ज्ञान-विज्ञानं जनानां पर्यन्तं गमिष्यति।

अस्मिन्नवसरे डॉ.जीतरामभट्ट, प्रो.लक्ष्मीश्वरझा एवं डॉ. पंकजकुमारमिश्र अपि युवा छात्रान् सम्बोधितवन्तः।

# सम्पादकीयम्

अयि अमरवाणीसमुपासकाः ! संस्कृतानुरागिणो बन्धवः !

होलीपर्वणः सादरं कोटिशः शुभकामनाः।

सामोदं मधुरपक्वैस्सहं सामाजिकमधुरताया परिचायकं होलीनामसंज्ञितं भारतस्य विश्वप्रसिद्धं पर्व सोल्लासं मार्चमासे भविष्यतीति विदन्ति विज्ञाः भवन्तः। समग्रमपि मनोमानिल्यमपाकृत्य भारतीया वयं राम खेले होरी लछुमन खेले होरी लंकागढ में रावन खेले होरी इति गानं गायामः। अहह! दर्शनीयं प्रेम प्रकटीभवति। धन्यो भारतदेशो धन्या वयमस्य देशस्य वासिनो यत्र मानवमूल्यानां संरक्षणं पर्वोत्सवैरावर्षं क्रियते। अस्तु अहं संस्कृतसंवादपक्षतः अग्रिममपूपादिकं भवद्भ्यो भवतीभ्यश्च सहर्षमर्पयन्ती प्रमोदमनुभवामि।

कृत्याकृत्यविचारदक्षाः विशिष्टा भवन्तो विजानन्ति यत् संस्कृतस्य समुत्थानाय किं समुचितं किं चानुचितमिति। दृश्यते यदा वित्तीयवर्षस्य समापनं सन्निकटम् आगतमिव बहवो जानन्ति तदा संस्कृतकार्यक्रमान् समायोजयन्ति। प्रायशः मार्चमास एव संस्कृतसंगोष्ठीसम्मेलनकविसमवायादीनां विपुलं दर्शनीयमायोजनं दृष्टिपथमायाति। किन्तु मदीयं वक्तव्यमिदमस्ति यत् यदि एकस्मिन्नेव मार्चमासे कार्यक्रमाः समायोजयिष्यन्ते संस्थाभिस्तदा कथं संस्कृतस्य सम्यक् प्रचारः शास्त्राणां संरक्षणं विषयस्य सम्यगुपस्थापनं कर्तुं शक्यते? विषयोऽयं सर्वैरपि चिन्तनीयः न तु हेय इति निवेदयामि। यस्य उद्देश्यस्य सम्पूर्तये सर्वकारो धनं प्रचुरं प्रयच्छति तत्किमनेनायोजनेन पूर्णं भवति? विशालनयना विपश्चित एव प्रमाणं न वयमिति वक्तुं शक्नोमि।

अतः संस्कृतसंवादपक्षतः अहं कामये यद् आवर्षं सर्वत्र सम्यक् कार्यक्रमाणामायोजनं भवतु। येन सर्वो जनः सर्वत्र यथासमयम् उपस्थातुं शक्नुयात्, अस्य कृते नूनमेव परामर्शो विधेयः। केवलमायोजनमेव करणीयं सर्वकारप्रदत्तं धनं व्ययीकार्यमेवेति धिया नैवायोजनानि करणीयानीति मम विचारः।

अस्तु अमरवाणी विजयताम् इति समुद्घोषं कुर्वती स्वमनोभावानाहं समाप्नोमि।

**जयतु संस्कृतं जयतु भारतम्।**

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**सं गोमंदिन्द्र वाजवदस्मे पृथु श्रवो बृहत्।**
**विश्वायुर्धेह्यक्षितम् ।।७।।**

अर्थ-मनुष्यों को चाहिए कि ब्रह्मचर्य का धारण, विषयों की लम्पकटता का त्याग, भोजन आदि व्यवहारों के श्रेष्ठ नियमों से विद्या और चक्रवर्ती राज्य की लक्ष्मी को सिद्ध करके सम्पूर्ण आयु भोगने के लिए पूर्वोक्त धन के जोड़ने की इच्छा अपने पुरुषार्थ द्वारा करें कि जिससे इस संसार का वा परमार्थ का दृढ़ और विशाल, अर्थात् अति श्रेष्ठ सुख सदैव बना रहे, परन्तु यह उक्त सुख केवल ईश्वर की प्रार्थना से ही नहीं मिल सकता, किन्तु उसकी प्राप्ति के लिए पूर्ण पुरुषार्थ करना भी अवश्य उचित है ।।७।।

**अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम्।**
**इन्द्र ता रथिनीरिषः।।८।।**

अर्थ-हे जगदीश्वर! आप कृपा करके जो अत्यन्त पुरुषार्थ के साथ, जिस धन के द्वारा बहुत-से सुखों को सिद्ध करनेवाली सेना प्राप्त होती है, उसको हम लोगों में नित्य स्थापन कीजिए ।।८।। फिर भी यह इन्द्र कैसा है, सो अगले मन्त्र में प्रकाश किया है--

**वसोरिन्द्रं वसुंपतिं गीर्भिर्गुणन्त ऋग्मियम्।**
**होम गन्तारमूतये ।।९।।**

अर्थ-सब मनुष्यों को उचित है कि जो ऐश्वर्य के निमित्त, संसार का स्वामी, सर्वत्रव्यापक इन्द्र परमेश्वर है, उसकी प्रार्थना और ईश्वर के न्याय आदि गुणों की प्रशंसा, पुरुषार्थ के साथ सब प्रकार से अति श्रेष्ठ विद्या, राज्यलक्ष्मी आदि पदार्थों को प्राप्त होकर उनकी उन्नति और रक्षा सदा करें ।।९।। किस प्रयोजन के लिए परमेश्वर की प्रार्थना करनी चाहिए, सो

अगले मन्त्र में प्रकाश किया हैसुतेर्तुते न्योकसे बृहद् बृहत एदुरिः। इन्द्राय शूषमर्चति ।।१०।।

सुतेसुते सत्र में प्रकाश को करनी चाहिए, सो

अगले मन्त्र में प्रकाश किया है-

# साङ्ख्ययोगदर्शनं लोकजीवनदर्शकम्।।

**-डॉ अरविन्दकुमारतिवारी**

सकलकल्मषजनिततापत्रयपरिशमनसमर्थं साङ्ख्ययोगदर्शनं भारतीयदर्शनपरम्परायाम् अद्वितीयं स्थानमधिकरोतीवेति को न जानाति। विदन्ति सहृदया यदामिमं दर्शनमिदं महर्षि-कपिलप्रणीतम् आध्यात्मिकाधिभौतिकाधिदैविकतापविनाशाय प्रदिष्टमस्ति।

मान्याः! संसारप्रसृतं दुःखं न कमपि जनं विमुञ्चतीति विख्यातं मतं दार्शनिकानाकर्षतीव। विना श्रमं सम्पदभिलाषी भिक्षुकोऽपि दुःखितः, परराष्ट्रोत्कर्षभयाद् राजापि दुःखितः, महद्द्रविडाभिलाषी वैद्यो दुःखितः, स्वधनक्षयसञ्जातविस्मयो रोगी दुःखितः, सरसमधुरकाव्यरचयिता ईर्ष्यानदीष्णजनोपहसितकाव्यः कविर्दुःखितो अश्रूयमाणवाक्यो वक्ता दुःखितः, भार्या पतिजनद्रव्यव्ययदक्षा दुःखिता स्वपरिश्रमार्जित-धनव्ययदर्शनसंक्षुब्धो भर्ता दुःखितः, आचरणश्रवणमननपरिशीलनौदासीन्यशिष्यजनकुपित आचार्यो दुःखितः, गुरुजनध्यापनौदासीन्यसन्तप्तोऽन्तेवासी दुःखितः, स्वतनयाचरचणविलोकनरतिः पिता दुःखितः, पितृवचनाननुपालनरतस्तनयोऽपि पीडितः, हन्त! सर्वोऽपि स्वस्वाभिलाषसम्पूर्तये प्रतिपलं विषीदन्नवतिष्ठते। इदमखिलं विचिन्त्य महर्षिणा रचितमिदं दर्शनं दुःखस्य लोकजीवने शरीर आत्मतत्त्वमिव दृश्यत इति नातिचित्रम्! अतस्साङ्ख्यमिदं लोकजीवनदर्शकम्।

महोदयाः! इदमप्यस्य दर्शनस्य वैशिष्ट्यमेवास्ति, यदवलोक्यतां सर्वोऽपि संसारोऽन्वर्थसञ्ज्ञो धावतीवाद्य आ प्रभाताद् रात्रिं यावत्। सर्वमेतदालोक्यैव दूयमानं जगद् भगवता मोक्षोपायश्चिन्तितः। अयमेवोपायः साङ्ख्ये ज्ञानरूपेण योगे प्रयोगरूपेण च समुपदिष्टः।

यथा साङ्ख्यकारिकायाम्-

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।

दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्।। 1

योगदर्शने अयमेव भावः क्रियारूपेण एवं प्रोक्तः-

योगश्चित्तवृत्तिनिरोधः। 2

महर्षिकपिलः संसारदुःखानलतप्तमानवमोक्षणाय प्रोक्तं यत्

.अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपरमपुरुषार्थः। 3

सत्यमिदं भारतीयदर्शनानाम् अन्यतमोऽस्ति पुरुषार्थो मोक्षः। सर्वोऽपि जीवो मोक्षाभिलाषी विलोक्यत एवेति। अतः मोक्षशास्त्रमिदं चिकित्साशास्त्रवच्चतुर्व्यूहम्। यथा हि रोग आरोग्यं रोगनिदानं भैषज्यमिति। तथैव हेयं हानं हेयहेतुर्हानोपायश्चेति चत्वारो व्यूहा मोक्षशास्त्रस्य व्याख्यानविषया भवन्ति। तत्र दुःखत्रैविध्यं हेयं, तदत्यन्तनिवृत्तिर्हानं, प्रकृतिपुरुषसंयोगद्वारा चाविवेको हेयहेतुः, विवकेख्यातिस्तु हानोपायः। 4 क

एतदेव व्यासभाष्ये प्रोक्तम्- तत्र दुःखबहुलः संसारो हेयः, प्रधानपुरुषयोस्संयोगो हेयहेतुः, संयोगस्यात्यान्तिकी निवृत्तिर्हानम्, हानोपायः सम्यग्दर्शनम्। 4 ख

सम्पूर्णोऽपि लोकः पञ्चविंशत्यां तत्त्वेष्वेव व्याप्तमस्तीति प्रथममुवाच महर्षिः---

सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलानि भूतानि पुरुष इति पञ्चविंशतिर्गणः। 5

इमान्येव तत्त्वानि पुरुषविशेषश्च सम्मिल्य षड्विंशतिर्योगे विलसन्तीति सर्वैरेव ज्ञायते। यथा-

विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि। 6 अर्थात् विशेषपदवाच्यानि पञ्चमहाभूतानि एकादशेन्द्रियाणि, अविशेषाणि सूक्ष्मतन्मात्राणि, लिङ्गमात्रं महत्, अलिङ्गं प्रकृतितत्त्वम्। ईश्वरश्च असौ तु प्रथमपाद एव मुनिना पतञ्जलिना कीर्तितः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष 7 इति। यस्य प्रणिधानेन समाधिलाभो भवति। 7 अस्येश्वरस्य ध्यानात् शरीरे जायमानविक्षेपादयो नोत्पद्यन्त इति सूत्रकारेण सम्यगुक्तम्। यथा-

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावष्ठच। 8 प्रत्यक्चेतनेत्यनेन चित्पुरुज़्ज्ञानमीप्सितम्। अन्तरायाः क इति जिज्ञासायामुच्यते-

व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः। 9

एतदेव वक्तव्यमस्माकं यल्लोक इमे विक्षेपाः प्रसृता मानवान् दहन्ति, येषामुन्मूलनाय साङ्ख्योगदर्शनावतरणमस्मिन् संसारे कारुणिकेन महर्षिणा कृत इति। समानं लक्ष्यमनयोर्दृष्टम्। दुःखविनाशकत्वमिति। आभ्यां प्रमेयानां सिध्दौ त्रीणि प्रमाणानि स्वीकृतानि-

दृष्टमनुमानमाप्तवचनञ्च सर्वप्रमाणसिध्दत्वात्।

त्रिविधं प्रमाणमिष्टं प्रमेयसिध्दिः प्रमाणाध्दि।। 10

योगसूत्रकृतापि साङ्ख्येन सह स्वमतिर्दर्श्यते। यथा-

प्रत्यक्षानुमानागमाः प्रमाणानि। 11

वस्त्वस्तुविवेकज्ञानाय लोके प्रमाणानीमानि महत्त्वपूर्णानि मन्यन्ते। सर्वोऽपि लौकिको बुध्दिमान् प्राणी प्रमाणत्रयेणैव जीवनमतिवायहतीति मत्वानयोर्लोकजीवनदर्शकत्वं सिध्यत्येव।

मान्याः! भवद्भिरिदमपि ज्ञेयमस्ति यत् साङ्ख्ययोगदर्शने भविज़्यत्कालिकमेव दुःखं हेयमस्ति। अतीतकालिकं तु न हातुं शक्यते, वर्तमानन्तु भुज्यमानमेवास्ति। अतएवोक्तम्-

हेयं दुःखमनागतम्। 12 लोकेऽपि श्रूयत एव जनैरिदम्। अस्माभिर्यत्कृतं तद् भुज्यते। आगामिजन्म सुखमयं स्यादेतदेव यज्ञदानादिकृत्यानि करणीयानि। इदमेव तथ्यं सत्यं यन्मूढोऽपि ग्राम्यो नागरो वा सम्यग्जानाति किं पापं किञ्च पुण्यमिति। एतद्बोधनायैव दर्शनमिदं श्रावितम्। समुद्घोषयति साङ्ख्यं यद् धमानुष्ठानेन जीवो नाकमेति, अधर्मानुष्ठानेनाधोलोकञ्च प्रयाति। यथा-

धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण।

ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः।। 13

एतत्सर्वमपि लोकहिताय लोकजीवनानुरूपमस्ति। अतस्साङ्ख्ययोगदर्शनस्य लोकजीवनत्वं स्वयंसिध्दमस्ति।

योगदर्शने साधनपादे व्युत्थितचित्तानां कृते यः सूत्रोपदेशः कृतोऽस्ति, स दर्शनीयो जगताम्। यमनियमासनप्राणायामप्रत्याहारधारणध्यानसमाधिनामभिर्यानि14 अङ्गानि प्रोक्तानि तानि तु विवेकख्यातिपर्यन्तं ज्ञानदीप्तिं कुर्वन्तीति। एषामनुष्ठानेन क्लेशानां क्षयो भवति।15

अत्र अहिंसासत्यास्तेयापरिग्रहाख्ये यमे जिते सति महांल्लाभो भवति साधकानामिति। एवमेव प्रकारेण शौचसन्तोषतपस्स्वाध्यायेश्वरप्रणिधानाभिधो नियमो यदि साधकेन जनेन स्वजीवने स्वीक्रियेत तदा जीवनं सानन्दं गच्छेत्। आसनप्राणायामप्रत्याहारधारणाध्यानसमाधिवतान्तु का कथा! दिव्यो योगः, पश्यन्तु सम्पूर्णेऽ पि संसारे हिंसा प्रवर्धमाना सुरसेव दृश्यते। सत्यवादिनः कियन्त इति वक्तुं न पार्यते। अस्तेयिनां सङ्ख्या अनन्ताः, अपरिग्रहवन्तः कियन्त इत्यपि सुविदितमेव भवताम्। देशे सर्वत्र यमस्यास्य पालनं जनैर्नैव क्रियमाणमस्ति। यस्मात्कारणाद् देशेऽसन्तोषो व्याप्तो वर्तते। यदि जनैरयं यमो विधिनानुपाल्येत तदा लोकजीवनं सर्वथा सुखमयं जायेत। अतो योगदर्शनस्य लोकजीवनत्वं सिध्दं भवति। एतेषां योगाङ्गानामनुष्ठानेन पृथक् - पृथग्लाभा भवन्तीति प्रोक्तं पातञ्जले। यथा- अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः। 16 श्रूयतामिदं वचनं विलोक्यतां संसारः, सर्वत्र आतङ्कवादः प्रसरन् वर्तते। न क्वचिदपि मानवस्सुखं शान्तिं वा लभते। सर्वशक्तिमान् सर्वविधशस्त्रात्रसम्पपन्नो देशः अमेरिकाख्योऽपि सम्प्रति चिन्तिततिष्ठति। अस्माकं देशे प्रतिवेशी पाकिस्तान दुष्टजन इव काश्मीरराज्यवसुधामधिकर्तुमुत्सहते। तत्रत्यान् निवासिनो निहन्ति। अहिंसाया यदि पालनं भवेच्चेद् अहिंसकजनानां सम्पर्कमात्रेण हिंसका अपि हिंसावृत्तिमपहाय धर्ममार्गमनुसरेयुरिति वक्तुं शक्यते। लोके दृश्यतेऽपि स्वल्पादपि स्वल्पाहिंसाप्रियजनसंसर्गेण हिंसकस्त्यजति हिंसनमिति। किञ्च महात्मनो बुद्धस्य सङ्गमवाप्य स्वल्पकालिकम् अङ्गलिमालाख्यो हिंसावृत्तिमजहादिति। कस्यचिद्वा महात्मनः संसर्गेण वाल्मीकिरपि लुण्ठनादिनिन्दनं कर्म त्यक्वा रामरामरामोच्चारणेन महानभूद् अद्भुतं रामायणञ्चारचयदिति।

सत्यप्रतिष्ठायां क्रियापलाश्रयत्वम्। 17क श्रूयत इदं यत् सत्यवादिनां तपस्विनां वाणी परिणामदायिनी , स्मर्यतां महाकविप्रणीतमभिज्ञानशाकुन्तले प्रदत्तं शापः,

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिज़्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।।

न वचनमन्यथा भवितुमर्हति। ख

एवमेव सत्यवादी यदि ब्रूते 'ज्ञानी भव तदा श्रोता भवति ज्ञानी। सम्प्रति सर्वो जन उपदेष्टा न पालयिता। अतो लोकोपराय सत्यस्य कियन्महत्त्वमस्तीति विज्ञातुं शक्यते। अस्तेयप्रतिष्ठायां

सर्वरत्नोपस्थानम्। 18 ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः। 19 अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः, 20 शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः। 21 सन्तोषादनुत्तमः सुखलाभः। 22 स्वाध्यायादिष्टदेवतासम्प्रयोगः 23 समाधिसिद्धिरीश्वरप्रणिधानात् 24 ततः प्राणायामजये क्षीयते प्रकाशावरणम्। 25 ततः प्रत्याहारजये परमा वश्यतेन्द्रियाणाम् 26 बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः। 27 उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च। 28 कायाकाशयोः सम्बन्धाल्लघुतूल-समापत्तेश्चाकाशगमनम्। 29 एवंप्रकारेण विभूतिपादे महतीनां विभूतीनां वर्णनं कृतमस्ति, सर्वलोकोपकारि वर्तते। यदि मानवैरिदं योगशास्त्रमधीयीत तदा निखिलस्यापि संसारस्य जीवनं समुन्नतं भूयादिति वच्मि। सम्प्रति तु बहुभिर्योगगुरवः केवलं प्राणायामपरायणा एव दृश्यन्ते, किञ्च चित्तमलानामाक्षालनाय प्रदिष्टं योगशास्त्रं चिकित्साशास्त्रत्वेनोपदिशन्ति, नैतदुचितं यमनियमासनाभावे कथं प्राणायाणस्थैर्यम्? अतस्सर्वाङ्गमुपादेयं न तु प्राणायामैकेन जनो लभेत शान्तिम्। वदन्तु विज्ञाः! हिंसारतो जनः, असत्यभाषणनिरतः, परद्रव्यापहरणरमणमानसः, ब्रह्मचर्यपालनासक्तो वा प्राणायामं जेतुं शक्नोति? नैव कदापि नैव। एवमेव अशुचिर्जनः, असन्तुष्टः, सुखदुःखादिद्विन्द्वसहनाक्षमः, परित्यक्तस्वाध्यायः, नास्तिको वा प्राणायामपरायणो भवितुमर्हति? नैव। अतस्संसाराभ्युन्नतये यमनियमासनविजये सत्येव प्राणायामो विधेयः। अन्यच्च पश्यन्तु श्रीमन्तः! मनवानां चित्तं दूषितमधुना। परोत्कर्षं जनमवेक्ष्य हीनसम्पज्जनचित्तं पीडितं भवत्येव। यदि स जनश्चित्तप्रसादनमिच्छति तदा मैत्रीकरुणामुदितोपेक्षाणां पुण्यापुण्यविषयाणां भावनां कुर्यात्। अनेन चित्तं निर्मलतामाप्नोति। सर्वे यदि योगदर्शनदर्शितमार्गं चरन्तु चेज्जीवनं लोकस्य दर्शनीयं स्यादिति सुविदितमेव साधारणजनानामपि।

साङ्ख्यमपि लोकजीवनदर्शकं दर्शनमिति पूर्वमेव निलाभितमेव। अयि विपश्चितः! साङ्ख्यदर्शनस्य चतुर्थेऽध्याये या आख्यायिका उपदिष्टास्ता अनुपमा मन्येरन्। तासामखिलानामपि जीवनदर्शनं दर्शनीयमेवास्ति। यथा-

कश्चिद् राजकुमारो मूलनक्षत्रजन्मा परित्यक्तो वनवासिभिः पालितः तेषु रममाणो वयसि प्रथमे राजपुरुषैः त्वं राजपुत्रोऽसि भोः!' इति वचनश्रवणाद् राजपुत्रोऽहमिति तत्त्वज्ञानस्मृतिः। राजपुत्रवत् तत्त्वोपदेशात्। 30 परिग्रहो न करणीयो यतोहि धनत्यागे सुखं भवति तद्वियोगे च दुःखम्। अतः प्रोक्तं- श्येनवत् सुखदुःखी त्यागवियोगाभ्याम 31 त्रिविधदुःखविनाशार्थं शास्त्रप्रदिष्टमार्गत्यागेन बन्धनं भवति जडभरतवदित्युपदिशति महर्षिकपिलः- असाधनानुचिन्तनं बन्धाय भरतवत् 32 संसारे स्वकर्मणि संलग्नजनेन सम्मर्दे न स्थातव्यं कलहप्राप्तेरित्युपदिशति आचार्यो- बहुभिर्योगे विरोधे रागादिभिः कुमारीशङ्खवत्। 33 आशाहीनो जनो निरन्तरं सुखं लभते विषयावाप्तिशून्यादिति समुपदिशन् ब्रूते महर्ज़िः- निराशः सुखी पिङ्गलावत्। 34 क श्रीमद्भगवद्गीतायामपि भगवता समुद्घोषितं यत्

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः। 34 ख।

यो निर्माय निलयं न निवसति, परनिर्मितगृहे वसति, असौ सर्पवन्मान्यः इति निदिशन्निलिखत्सूत्रमिदं महर्षिकपिलः- अनारम्भेऽपि परगृहे सुखी सर्पवत्।35 अतः लोकजीवनाय स्वगृहं निर्मातव्यमिति। संसारे विद्यानां भ्रमरवत् पुष्पकण्टकाद्यनुपादेयं हित्वा परागमिव गुरूणाञ्चासङ्ख्यात्वात् यदुपादेयं तत्त्वं तदेव ग्राह्यं नान्यदित्युपदिशंल्लोकजीवनं द्रढयति महर्षिः- बहुशास्त्रगुरूपासनेऽपि सारादानं षट्पदवत्। 36 धन्यः परमकारुणिको भगवान् परमर्षिः परमलौकिको येन समाधिभावनां द्रढीकर्तुं शरकार इव ध्यानं देयमिति सन्दिशतिः। एवं कृते सति कार्यसिद्धिर्भवतीति बोधव्यम्। इषुकारवन्नैकचित्तस्य समाधिहानिः। 37 अन्ते स्मरामि स्मारयामि च यत् वनौकसः सन्तोऽपि लौकिकज्ञा वयमिति कण्ववचनम्। 38 अर्थात् वनवासिनस्तपस्विनो लोककल्याणाय वनमधिवसन्ति। स्वयमेव महर्षिमुखात् श्रूयते यत् लोकजीवनाय लोकनिर्मितनियमाः पालनीया नान्यथा आनर्थक्यं भवति, यथा-- कृतनियमलङ्घनादानर्थक्यं लोकवत्। 39

अनेन मयारविन्देन साङ्ख्ययोगदर्शनं लोकजीवनदर्शकमिति यथामति प्रपञ्चितमिति।


सन्दर्भाः-
1, साङ्ख्यकारिका। 1
2, योगसूत्रम्। 1-2
3, साङ्ख्यसूत्रम्। 1-1
4क, साङ्ख्यसूत्रभाष्यं विज्ञानभिक्षुकृतं 1-1
4ख, योगसूत्रे व्यासभाष्यम्। 2-15
5, साङ्ख्यसूत्रम्। 1-65
6, योगसूत्रम्। 2-19
7, योगसूत्रम्। 1-24
8, ईश्वरप्रणिधानाद्वा। योगसूत्रम्। 23
9, तत्रैव 1-30
10, साङ्ख्यकारिका।
11, योगसूत्रम्। 1-7
12, योगसूत्रम्। 2-16
13, साङ्ख्यकारिका 44
14, योगसूत्रम्।2-29
15, योगसूत्रम्।2-28
16, तत्रैव। 2-35
17, क तत्रैव। 2-36
ख अभिज्ञानशाकुन्तलम्। 4
18, तत्रैव। 2-37
19, तत्रैव। 2-38
20, तत्रैव। 2-39
21, तत्रैव। 2-40
22, तत्रैव। 2-42
23, तत्रैव। 2-44
24, तत्रैव। 2-45
25, तत्रैव। 2-52
26, तत्रैव। 2-55
27, तत्रैव। 3-38
28, तत्रैव। 3-39
29, तत्रैव। 3-42
30, साङ्ख्यसूत्रम्। 4-1
31, तत्रैव। 4-5
32, तत्रैव। 4-8
33, तत्रैव। 4-9
34 क, तत्रैव। 4-11
ख, श्रीमद्भगवद्गीता 12/16
35, तत्रैव। 4-12
36, तत्रैव। 4-13
37, तत्रैव। 4-14
38, अभिज्ञानशाकुन्तलं 4



आदर्शवैदिकविद्यालयइ0का0
नंगलासिनौली,बागपत,उ0प्र0


## जनो जीवने किं न किं प्राप्य तुष्यति


डॉ.राजेन्द्र त्रिपाठी 'रसराज '
अध्यक्ष, संस्कृत विभाग
इलाहाबाद डिग्री कॉलेज
इलाहाबाद विश्वविद्यालय, इलाहाबाद


जनो जीवने किं न किं प्राप्य तुष्यति।
कदाचित्सुखं क्वापि दुःखं नु पश्यति ।1

क्वचिद्याति गगनं समारुह्य याने ।
क्वचित्मातृभूमौ शरीरं विमुञ्चति।।2।

गृहस्थाश्रमे सन्ततिं नित्यमिच्छन्।
प्रियन् प्रेमप्रीतिं प्रियां प्राप्य तुष्यति ।3

गृहं भोजनं जीविकां वाऽपि लब्ध्वा।
धनोपार्जने कुत्र लोकं न गच्छति ।4।

कदा किं कथं केन मार्गेण लब्धुम्।
भृशं कार्यमवधार्य कालं न गणयति ।5।

धनं वा बलं प्राप्य शक्तिं प्ररोहति ।
अनीतेन् कुरीतेन् प्रचलनाय दृप्यति ।6।

ऋणं चानृतं नानुचिन्त्याऽपि नित्यम्।
कुतन् केन कस्माद्धनं चाप्युपार्जति ।7।

दुराचारिणां दुर्गतिं वीक्ष्य मन्ये ।
वृथा जीवनं नन्विदम् चैव सिध्यति ।8।

कथं शैशवं यौवनं वा व्यतीतम् ।
जरा जीवने दुर्दिनं वीक्ष्य तृष्यति ।9।

## सार्वभौमिकं संस्कृतम्- डॉ द्विवेदी

वार्ताहरः सुनीलः। जटौला, गुरुग्रामः,हरियाणा फाल्गुन कृष्ण चतुर्दशी संवत् 2074 भौमवासरे( 13/02/2018) गुरुग्रामस्य जटौलास्थ राजकीय महाविद्यालये संस्कृतभारती हरियाणा द्वारा संस्कृत सम्भाषण शिबिरस्य




उद्घाटनं सम्पन्नम्।

कार्यक्रमेऽस्मिन् अध्यक्षः विद्यालयस्य प्राचार्यः डॉ सुरेश धनेरवाल महोदयः आसीत्।कार्यक्रमस्य मुख्यातिथिः डॉ श्रेयांश द्विवेदी उपाध्यक्षः



संस्कृतभारती हरियाणा स्वीयोद्बोधनेन संस्कृतस्य सार्वभौमिकं महत्त्वं प्रतिपादितवान्। डॉ द्विवेदी महोदयःप्रोक्तवान् यत् संस्कारप्रदा संस्कृतभाषा सर्वेषां मानसे हृदि रक्ते च राजते। अद्य तां भाषां जनभाषां कर्तुं सर्वेषां मुखे आनेतुं सरलतया व्याकरणनियमान् सरलीकृत्य दशसु दिवसेषु संस्कृतेन सम्भाषणे नैपुण्यं प्रदातुं भवतां सहयोगार्थं संस्कृतभारती नगरं नगरं गच्छन्ती अत्र समागता। भवन्तःसंस्कृतं पठन्तु भारतस्य गौरवं रक्षन्तु यतोहि संस्कृतभाषा वैज्ञानिकी भाषा वर्तते। अस्मिन्नवसरे प्राचार्यमहोदयाः डॉ द्विवेदिमहोदयानां स्वागतं कृतवन्तः। अध्यक्षीये भाषणे ते प्रोक्तवन्तः यत् प्रमोद महोदयानां प्रयासेन संस्कृतस्य विद्वांसः हरियाणा संस्कृत अकादम्याः उपाध्यक्षाणाम् उद्बोधनेन अहं अति प्रसन्नोऽस्मि। डॉ द्विवेदिमहोदयानां कार्यं वैदुष्यं समर्पणञ्च दृष्ट्वा अनुभवामि यत् हरियाणा सर्वकारः संस्कृतभारती च निष्पक्षरूपेण चयनं कृतवती। एतेषां प्रयासेन संस्कृतभारती नूनं संस्कृतं जनभाषां कर्तुं प्रभवति। अस्मिन्नवसरे श्री प्रमोदःजिला संयोजकः संस्कृतभारती, गुरुग्रामः, प्रास्ताविकं प्रस्तुतवान्। डॉ श्रीमतीआशुतोष महोदया धन्यवाद-ज्ञापनं कृतवती। मञ्चसञ्चालनं डॉ सुनीलःसफलतया कृतवान्।शिविर शिक्षकः श्री अमनदीपःमधुरतया संस्कृतगीतम् उपस्थापितवान् ।

## श्रीमद्भगवद्गीता मानवीयं वैज्ञानिकम्- डॉ श्रेयांश द्विवेदी

वार्ताहरःडॉ गणेशःपण्डितः।

सोनिपतस्थस्य खानपुरकलाँ इत्यस्मिन् स्थले भगत फूलसिंह महिला विश्वविद्यालये आचार्याणां श्रेयांशद्विवेदीवर्याणां व्याख्यानं सुसम्पन्नम् ।




आधुनिके युगे भगवद्गीतायाः प्रासङ्गिकताम् अधिकृत्य एतैः सोदाहरणं व्याख्यानं कृतम् ।गीतायाः प्रत्येकमपि अध्यायस्य वैशिष्ट्यं नामग्राहम् एतैः सूपपादितम् । देशस्यास्य विभिन्नविश्वविद्यालयेभ्यः पुनश्चर्यापाठ्यक्रमार्थं तत्र समागताः उपचत्वारिंशत् सङ्ख्याकाः सहायकाचार्याः एतेषां व्याख्यानं श्रावं श्रावं स्वीयां जिज्ञासां शमयितुं शक्ताः अभवन् । कार्यक्रमनिदेशकैः डॉनरेशभार्गववर्यैः अमीषां सत्कारः पादपप्रदानपुरस्सरं कृतः। सर्वेऽपि भागग्राहिणः गीताध्ययनासक्तिं च प्राकटयन् ।

# ‘वैविध्य-समावेशिनी संस्कृत-पत्रकारिता’



- बलदेवानन्द-सागरः
Email-baldevanand.sagar@gmail.com

संस्कृत-पत्रकारितायाःवैविध्य-समावेश-स्वरूप-विषये विस्तरेणकिमपि कथनात् प्राक् सुधी-पाठकानां पुरस्तात् एतत् स्पष्टीकर्तुं समीहे यत् लोके साम्प्रतं हिन्दी-भाषायाः आङ्गलभाषायाः वा अन्यासां प्रचलितानां भाषाणां पत्रकारिता-वैविध्यमिव संस्कृत-पत्रकारितायाः वैविध्य-समावेशः अपि तावता अवधानेन नैव परिचर्च्यते, परञ्च तथ्यमेतत् सूर्य-प्रकाशमिव सुद्योतितमेव यत् अधुनातनेऽपि काले भारतस्य प्रायेण सर्वेष्वपि राज्येषु केषुचित् विदेशेष्वपि सुबहु-कालात् अनेक-विधाः वैविध्य-समावेश-स्वरूपान्विताः संस्कृत-पत्र-पत्रिकाः प्रकाश्यन्ते स्म प्रकाश्यन्ते च।

एताः संस्कृत-पत्र-पत्रिकाः समीक्ष्य एवं वक्तुं शक्यते यत् आरम्भादेव संस्कृत-पत्रकारिता वैविध्य-समावेशिनीप्रावर्तत, अपि चैषा, इतः परमपि अधुनातन-जीवनस्य सर्व-विध-वृत्तान्त-समावेशिनी सती बुधानां विबुधानां सहृदयानां सुरभारती-समुपासकानां संस्कृतानुरागिणाञ्च चेतान्सि समाकर्षयिष्यति।

कदा प्रभृति आरब्धा एषा आधुनिकी संस्कृत-पत्रकारिता ?

साम्प्रतं प्रश्नोऽयं समुदेति यत् विदुषां मतानुसारेण संस्कृत-पत्रकारितायाः शुभारम्भः कदा प्रभृति स्वीकर्तव्योऽस्ति ? प्रामाणिक-समीक्षादृशा साम्प्रतं संस्कृत-पत्रकारितायाः वैविध्य-समावेश--विषये किमपि लिलेखिषुरहं न केवलं लेखकधिया, अपि तु विगतेभ्यः द्वाचत्वारिंशद्वर्षेभ्यः आकाशवाण्याः वार्त्ता-सेवा-प्रभागे,द्वाविन्शत्संवत्सरेभ्यः च दूरदर्शने संस्कृत-वार्त्तानां सम्पादनानुवाद-प्रसारणैः अधिगत-दीर्घानुभवाधारेण वक्तुमुत्सहे यत् व्यवहारे लोक-जीवने च समधिक-प्रयोगाभावेऽपि सुरभारती एषा सर्वदैव, साहित्ये वा दर्शने वा शिल्पे वा योगे वा नाट्ये वा आयुर्वेदे वा विविध-विज्ञानेषु वा पत्रकारितायां वाविविध-रूपा सती समावेशात्मिका सती अधिकाधिकानां मनःस्पन्दिनी सती चानारतंव्यराजत विराजते विराजिष्यते च । अत्रास्ति किमपि विशिष्टं कारणमिति परिभावयामि । संस्कृत-पत्रकारितायाः संक्षिप्तम् ऐतिह्यम् -

यथा अत्रभवद्भिः बहुधा श्रुतं स्यात् यत् -‘भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा ।’ अतः यया रीत्या भारतीया संस्कृतिः वैविध्य-समावेशिनी वर्त्तते तद्वद् संस्कृत-पत्रकारितापि वैविध्य-समावेशिनी सती विजयते। यथैव हिन्दीभाषायाः पत्रकारितायाः आरम्भ-विषये किमपि लिख्यते तदा सर्वप्रथमं हिन्दी-भाषायाः प्रथम-पत्रं ‘‘उदन्त-मार्तण्ड’- [ 1826 ई., सम्पादक-पं.जुगलकिशोर-शुकुल] इति नूनं सन्दर्भ्यते । तद्वद् विदांकुर्वन्तु अत्र भवन्तो भवन्तः यत् संस्कृत-पत्रकारितायाः सार्धैक-शत-वर्षीया सुदीर्घा यात्रैषा गत-ख्रिष्टीयवर्षे [1916] मे-मासान्ते पूर्णतां गता । इतः पूर्वं 1866-तमे ख्रिष्टीय-वर्षे जून-मासे प्रथमे दिनाङ्के काशीतः ‘काशीविद्यासुधानिधिः’-इति मासिकं पत्रं प्रकाशितमासीत्। संस्कृत-पत्रकारितायाः इतिहासान्तर्गतं प्रकाशितस्य प्रथमस्य संस्कृत-मासिक-पत्रस्य अस्य अपरं नामासीत्ङ्क ‘पण्डित-पत्रिका।’ साम्प्रतं विद्वद्भिः स्वीक्रियते यत् अस्मादेव कालात्वैविध्य-समावेशिन्याःआधुनिक-संस्कृत-पत्रकारितायाः शुभारम्भः परिगण्यते चेत् साधु !

भारतस्य क्षेत्रीय-भाषाणां पत्रकारितायाः इतिहासाध्ययनेन प्रतीयते यत् क्षेत्रेऽस्मिन् अनेकासां दैनिक-मासिक-पत्र-पत्रिकाणां राष्ट्रिय-स्वाधीनता-संग्रामे महत्त्वाधायि योगदानम् अवर्त्ततपरञ्च केसरी-इति पत्रस्य तत्रान्तरे किमपि विशिष्टं महत्त्वमासीत्। तदा स्वाधीनता-संग्रामावसरे अनेकविधानां काठिन्यानां साम्मुख्यानन्तरं नामजोशी-वर्यस्य व्यावहारिक-कुशलता-पुरस्सरं 1881-तमे ख्रिष्टीय-वर्षे जान्युआरि-मासे चतुर्थे दिने ‘केसरी’-इति मराठी-भाषिकस्य साप्ताहिक-पत्रस्य प्रकाशनं प्रतिभौमवासरम् आरब्धम्।

यं विषयं सोद्देश्यं संकेतयामि सोऽस्ति ‘केसरी’- इति मराठी-साप्ताहिक-पत्रस्य मुख-पृष्ठोपरि प्रकाश्यमानःपण्डितराज-जगन्नाथस्य ‘भामिनीविलास’ इति-ग्रन्थस्य समुपयुक्तः संस्कृत-श्लोकः यो हि ‘केसरी’-पत्रस्य कार्योद्देश्यंद्योतयति। विष्णुशास्त्री-चिप्लूणकरेण चितः ‘केसरी’-मुखपृष्ठोपरि मुद्राङ्कितः श्लोकोऽस्ति -

‘स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण-सखे !,गज-श्रेणीनाथ ! त्वमिह जटिलायां वनभुवि।

असौ कुम्भि-भ्रान्त्या खरनखरविद्रावित-महा-गुरु-ग्राव-ग्रामः स्वपिति गिरिगर्भे हरिपतिः ।।’

महतो हर्षस्य विषयोऽयं यत् संस्कृत-पत्रकारिता स्वीय-आरम्भ-कालादेव वैविध्य-समावेशिनी सती प्राकाश्यम् आगमनात् प्रागेव [ ईस्वी. 1866-तः प्रागेव ] भारतस्य क्षेत्रीय-भाषासु बीजरूपेण व्यवह्रियते स्म। ममेदं विनम्रं मन्तव्यं यत् तदानीन्तन्याः विविध-भाषाणां पत्रकारितायाः वार्त्ताहराः, पत्रकाराः, लेखकाः, सम्पादकाः, प्रकाशकाः च आधिक्येन संस्कृतज्ञाः संस्कृतानुरागिणः सन्तः संस्कृति-संस्कृतनिष्ठाः चासनम्, पत्रकारितायाः समर्पित-कार्यार्थं संस्कृतस्य समृद्धं साहित्यम् आश्रयन्ति स्म।

तथ्यमेतत् सुस्पष्टं यत् भारतस्यस्वाधीनता-प्राप्त्यर्थं सामान्य-जनानां भाषासुसम्वादः विचार-सञ्चारः चावश्यकः आसीत् अत एव संख्यादृशा विभिन्नासु भारतीय-भाषासु अधिक -तराः, संस्कृत-भाषायां च न्यूनाः पत्रपत्रिकाः प्रकाशिताः अभूवन् । किन्तु भारतस्य सर्वेभ्योऽपि राज्येभ्यः प्रकाश्यमानानां संस्कृत-पत्र-पत्रिकाणां विषयजातं संख्याबलञ्च सन्दर्भयामश्चेत् तदा कस्याश्चन क्षेत्रीय-भाषायाः आहोस्वित् राष्ट्रभाषायाः हिन्द्याः वा उर्दू-आङ्गलभाषयोः तुलनायां समग्रतया प्रकाश्यमानानां संस्कृत-पत्र-पत्रिकाणां संख्या अधिकतरा सिद्ध्यति । अनुसन्धानानुसारेणराष्ट्रस्य सर्व-विध-संस्कृत-पत्र-पत्रिकाणां संख्यैषा120-तः 130-पर्यन्तं परिगणयितुं शक्यते।

लघुकाये आलेखेऽस्मिन् वैविध्य-समावेशिन्याः सार्धैक-शती-कालिकायाःसंस्कृत-पत्रकारितायाःइतिवृत्तं विस्तरेण वर्णयितुं नैव शक्यते, परञ्च कासाञ्चन प्रमुखाणांसंस्कृत-पत्र-पत्रिकाणाम् अध्ययनेन प्रतीयते यत् विविध-स्थानेभ्यः प्रकाशिताः प्रकाश्यमानाश्च एताः पत्रिकाः प्रामुख्येण द्विविधाः लभ्यन्ते । तयोरन्यतराः सन्ति शोध-पत्रिकाः यासु शोधलेखाः, प्राचीन-ग्रन्थाः, पाण्डु-लिपयश्च मुख्यतया प्रकाश्यन्ते स्म प्रकाश्यन्ते च। अपराः पत्रिकाः, सामान्यतया साप्ताहि- क्यः, पाक्षिक्यः, मासिक्यः, द्वैमासिक्यः, त्रैमासिक्यः, षाण्मासिक्यः, वार्षिक्यः, द्विवार्षिक्यश्च सन्ति यासु प्रायेण सर्वेषामपि विषयाणां सामग्री मुद्रिता विहिता विधीयते च। अत एव, ‘संस्कृत-पत्रकारिता वैविध्य-समावेशिनी’ इति सुतरांसुसिद्ध्यति।

साम्प्रतं पूर्वकालापेक्षया स्थितिः नितरां भिन्ना प्रतिभाति। प्रतीयते यत् संस्कृत-पत्रकारितायाः भविष्यत् उज्ज्वलमस्ति । आश्वस्ति-पुरस्सरं वक्तुं शक्यते यत् आसन्न-प्रायोऽयं कालः यदा युवकाः युवतयश्च आधिक्येन संस्कृतम् अध्येतुं भाषितुञ्च समीहिताराः, अपि च, सामाजिक-संचार-माध्यमेषु इतरभाषापेक्षया संस्कृतविद्याअधिकाधिकं प्रयुक्ता भविता।

स्वाधीनता-संग्रामावसरे संस्कृत-पत्रकारिता सर्वत्र बीजरूपेण सिद्धा -

बीजरूपेण इतर-भाषा-पत्रकारितायां प्रवर्त्तमाना सती आधुनिक्यैषा संस्कृतपत्रकारिता स्वतन्त्रता-संग्रामस्य विशिष्टोपलब्धित्वेन ख्यापयितुं शक्यते। नवीनविचाराणां सूत्रपातं प्रवर्धयितुं राष्ट्रीयतां विवर्धयितुं चैषा अभूतपूर्वम् अमूल्यञ्च योगदानं व्यदधात्। अनुसन्धानानुसारेण तथ्य-मेतद् स्पष्टीभूतं यत् 1832-तमे वर्षे बंगाल-एशियाटिक-सोसाइटीति संस्थया अंग्रेजी-संस्कृत-भाषयोः एका द्विभाषिक-शोध-पत्रिका प्रकाशिता। अस्यां पत्रिकायां संस्कृत-साहित्यस्य अनुसन्धानपूर्णाः गवेषणात्मक-पुरातन-सामग्रीयुताः आलेखाः प्रकाश्यन्ते स्म। अनया पत्रिकया आङ्गलभाषा-ज्ञातारः साक्षराः संस्कृतज्ञाः कामपि अभिनवां चेतनामनुभूतवन्तः, अपि च, राष्ट्रस्वभाषां साहित्यञ्च प्रति गौरवभावमधिगतवन्तः।

यथापूर्वं लिखितं काशी-स्थितेन गवर्नमेंन्ट-संस्कृत-कॉलेज्-इत्यनेन ‘काशी-विद्यासुधा-निधिः’ अथवा ‘पण्डित-पत्रिका’ नाम्नी मासिक-पत्रिका 1866-तमे ख्रिष्टीय-वर्षे जून-मासे प्रथम-दिनाङ्कात् प्रकाशयितुमारब्धा। तदनु, काशीतः एव,1867-तमे ख्रिष्टीय-वर्षे ‘क्रमनन्दिनी’-नाम्नी पत्रिका प्रकाशिता जाता। विशुद्ध-संस्कृत-भाषया प्रकाश्यमाने इमे पत्रिके प्राचीनानां विविध-विषयाणां संस्कृत-ग्रन्थान् प्रकाशयतः स्म। अत्रेदमपि वक्तुं शक्यते यद् अनयोः पत्रिकयोः विशुद्ध-वार्त्तापत्राणां किञ्चिदपि लक्षणं नैवासीत्। तत्रान्तरे, वर्ष-चतुष्टयानन्तरं 1872-तमे ख्रिष्टीय-वर्षे एप्रिल्-मासे लाहौरतः ‘विद्योदयः’- इति नवीन-सज्जा-युतं शुद्ध-वार्त्तापत्रमेकम् अवतारितम् । हृषीकेश-भट्टाचार्यस्य सम्पादकत्वेपत्रमेतत् संस्कृत-पत्रकारितायै अपूर्वं किमपि सम्बलंप्रादात्। ततः परंविद्योदयतः प्रेरणामादाय संस्कृत-भाषायाः अनेकाः नवीनाः पत्र-पत्रिकाः प्रकाश्यमागताः।

बिहार-राज्यस्य प्रथमं संस्कृत-पत्रं 1878-तमे ख्रिष्टीये वर्षे पटनातः प्रादुरभवत्। ‘विद्यार्थी’-नामकं मासिकपत्रमेतत् 1880-वर्षे पटनातः नियत-कालिकं सत् प्राकाश्यमानीतम्, अनन्तरम् उदयपुरं सन्नीतम्, ततः पाक्षिक-संस्कृत-पत्ररूपेण एतत् प्रकाश्यते स्म किञ्चित्-कालानन्तरं पत्रमिदं श्रीनाथद्वारा-तः प्रकाश्यते स्म। ततः परं एतत् हिन्दी-भाषायाः ‘हरिश्चन्द्र-चन्द्रिका’ ‘मोहनचन्द्रिका’ चेति पत्रिकाद्वयेन सम्भूय प्रकाशितं जातम् । संस्कृत-भाषायाः प्रप्रथमं पाक्षिक-पत्रमिदमासीत् यद्धि यथानाम विद्यार्थिनां हितानि विविधावश्यकताश्च आलक्ष्य सामग्री-जातं प्रकाशयति स्म। तत्कालीनः सुख्यातः संस्कृत-पत्रकारः पं.दामोदरशास्त्री अस्य पाक्षिक-पत्रस्य सम्पादकः आसीत् । अत एव सप्रमाणमिदं वक्तुं शक्यते यत् संस्कृत-पत्रकारिता वैविध्य-समावेशिनी सती सर्वदैव सर्वत्र च व्यराजत।

1880-तमे वर्षे पटनातः एव मासिकं ‘धर्मनीति-तत्त्वम्’ आरब्धम्, परञ्च नास्य विषये काचित् विशिष्टा सूचना अवाप्यते, न चास्य कश्चन अङ्कोऽपि लभ्यते।

1884-तमे वर्षे ओक्टोबर-मासे सप्तदश-दिनाङ्कात्केरल-राज्यस्य कुन्नूर-तः ‘विज्ञान-चिन्तामणिः’- इतिमासिकी पत्रिका प्राकाश्यमागाता 7 किञ्चित्-कालानन्तरं प्रचारातिरेक-कारणात् पत्रिकैषा पाक्षिकी, दशाह्निकी च सती अन्ततः साप्ताहिकी विहितासीत् । नीलकान्त-शास्त्रिणः सम्पादकत्वे पत्रिकेयं संस्कृत-पत्रकारितायाः विकासक्रमे अतितराम् उल्लेखनीया सिद्धा।

संस्कृतस्य समृद्धि-प्रतिष्ठयोः शिक्षाप्रणाली-परिष्कारस्य च कृते पण्डित- अम्बिकादत्त-व्यासेन 1887-तमे वर्षे स्थापिता संस्था ‘बिहार-संस्कृत-सञ्जीवन-समाजः’, संस्कृतस्य प्रचार-प्रसारार्थम् अनारतं प्रायतत। अस्याः संस्थायाः प्रथमोपवेशनं 1887-तमे वर्षे एप्रिल्-मासे पञ्चमे दिनाङ्के सम्पन्नम्, यस्य च आध्यक्ष्यं पॉप्-जॉन्-बेन्जिन्-इत्यनेन निर्व्यूढम्। उपवेशनेऽस्मिन् विभिन्नेभ्यो राज्येभ्यः अनेके संस्कृतानुरागिणः तदानीन्तनाः पत्रकाराः, लेखकाः, कवयः, वार्त्ताहराश्च सहभागित्वं निर्वोढुं सम्प्राप्ताः आसन्। संस्था-सचिवः स्वयं पण्डित-अम्बिकादत्त- व्यासः एवासीत्। अमुना समाजेन 1940-तमे वर्षे त्रैमासिकस्य ‘संस्कृत-सञ्जीवनम्’-इति पत्रस्य प्रकाशनमारब्धमासीत्। अत एव सप्रमाणमिदं वक्तुं शक्यते यत् संस्कृत-पत्रकारिता वैविध्य-समावेशिनी सती सर्वदैव सर्वत्र च व्यराजत।

ऊनविन्श-शताब्द्याः अन्तिमे दशक-द्वये अनेकाः पृथग्विधाः संस्कृत-पत्रिकाः प्रकाशिताः जाताः। राष्ट्रिय-आन्दोलन-दृशा एतासु ‘संस्कृत-चन्द्रिका’ ‘सहृदया’ च विशिष्टं स्थानमावहतः स्म। पूर्वं कोलकोतातः कोल्हापुरतश्च प्रकाश्यमाना ‘संस्कृत-चन्द्रिका’ अप्पाशास्त्रि- राशिवडेकरस्य सम्पादकत्वे दिगन्त-व्यापिनीं ख्यातिमार्जयत्। स्वीय-राजनैतिकानाम् आलेखानां प्रकाशन-कारणात् अप्पाशास्त्री नैकवारं कारावासेन दण्डितः आसीत्। संस्कृत-भाषायाःपोषणं,सम्वर्धनं,संस्कृत-भाषावित्सु उदार-मन्तव्याधानस्य प्रचारं, राष्ट्र-हितार्थं सुषुप्त-संस्कृतज्ञानांजागरणं चेत्यादि-लक्ष्याणि अवधार्य ‘सहृदया’ राष्ट्रिय-आन्दोलने महत्त्वाधायिनीं भूमिकामावहत्।

विन्श-शताब्द्याः आरम्भे लोकमान्यस्य बाल-गङ्गाधर-टिळकस्य नेतृत्वे अशेष-राष्ट्रं स्वदेशि-आन्दोलने सहभागित्वमावहत्। संस्कृत-पत्रकारितायाः कृते एतत् सम्वर्धन-युगमासीत्। तस्मिन्न- वसरे देशस्य विभिन्नेभ्यो भागेभ्यः अनेकाः संस्कृत-पत्र-पत्रिकाः प्रकाशिताः, यासु ‘भारतधर्मः’ [1901 ई.], ‘श्रीकाशीपत्रिका’ [1907 ई.], ‘विद्या’ [1913 ई.], ‘शारदा’ [1915 ई.], ‘संस्कृत-साकेतम्’ [1920 ई.] प्रभृतयः प्रमुखाः आसन्। ‘अर्वाचीनसंस्कृतसाहित्य’नुसारं 1918-तमे वर्षे पटनातःसंस्कृत-संजीवन-समाजेन पाक्षिकस्य ‘मित्रम्’-इत्यस्य प्रकाशनमारब्धमासीत्।

स्वतन्त्रता-संग्राम-दिनेषु अपराः प्रमुखाः संस्कृत-पत्रिकाः आसन्ङ्क ‘आनन्दपत्रिका’ [1923 ई.], ‘गीर्वाणः’ [1924 ई.], ‘शारदा’ [1924 ई.], ‘श्रीः’ [1931 ई.], ‘उषा’ [1934 ई.], ‘संस्कृत-ग्रन्थमाला’ [1936 ई.], ‘भारतश्रीः’ [1940 ई.] चेत्यादयः। 1938-तमे वर्षे कानपुरतः अखिलभारती- य-संस्कृत-साहित्य-सम्मलेनस्य ‘संस्कृत-रत्नाकरः’-इति मासिकं मुखपत्रम् आरब्धम् । श्रीकेदारनाथ -शर्मा अस्य सारस्वतः सम्पादकः प्रकाशकश्चासीत्। 1943-तमे वर्षे राष्ट्रिय-संस्कृत-विद्यापीठेन ‘गंगानाथ-झा-रिसर्च-जर्नल्’-इति त्रैमासिकी पत्रिका प्राकाश्यमानीता।

पंचमपुटस्य शेषभागः **'वैविध्य-समावेशिनी...**

स्वतन्त्रता-प्राप्तेरनन्तरं भारतस्य नाना-भागेभ्यः प्रकाश्यमानासु प्रमुखासु संस्कृत-पत्रिकासु, 'ब्राह्मण-महासम्मेलनम्' [1948 ई.], 'गुरुकुलपत्रिका'[1948 ई.], 'भारती' [1950 ई.], 'संस्कृत-भवितव्यम्' [1952 ई.], 'दिव्यज्योतिः' [1956 ई.], 'शारदा' [1959 ई.], 'विश्व-संस्कृतम्' [1963 ई.], 'संविद्' [1965 ई.], 'गाण्डीवम्' [1966 ई.], 'सुप्रभातम्' [1976 ई.], 'संस्कृत-श्रीः' [1976 ई.] 'प्रभातम्' [1980 ई.], 'लोकसंस्कृतम्' [1983 ई.], 'व्रजगन्धा' [1988 ई.], 'श्यामला' [1989 ई.] प्रभृतयः परिगण्यन्ते। आसु सर्वासु संस्कृत-पत्र-पत्रिकासु सन्निहितानां विविध-विषयाणां समीक्षणेन सप्रमाणमिदं वक्तुं शक्यते यत् संस्कृत-पत्रकारिता वैविध्य-समावेशिनी सती सर्वदैव सर्वत्र च व्यराजत।

अस्मिन्नेव अवधौ [1970-तमे वर्षे ] संस्कृत-पत्रकारितायाः क्षेत्रे विशिष्टा ऐतिहासिकी घटना समपद्यत यस्याः महानायकः आसीत्कर्नाटक-राज्यस्य मैसूरू-नगरस्थः सुप्रसिद्धः संस्कृत-विद्वान् गीर्वाणवाणीभूषणः, विद्यानिधिः, पण्डित-कळले-नडादूरु-वरदराजय्य- ङ्गार्यः, येन मैसूरू-तः 'सुधर्मा' इति दैनिकं संस्कृत-वार्त्ता-पत्रं प्रकाश्य विश्व-पत्रकारितायाः मञ्चोपरि संस्कृत-पत्रकारितायाः ध्वजमुत्तोलितवान् नैक-संवत्सर-पूर्वं दिवङ्गतेह्यपिपण्डित-कळले-नडादूरु-वरदराजय्यङ्गार्य-वर्ये, अधुनापि तस्यात्मजः श्रीसम्पत्कुमारः सम्पादकत्वेन 'सुधर्मा'-सातत्यं संधारयति, यद्यपि पूर्वं कदाचित् 1907-तमे वर्षे जान्युआरिमासे प्रथम-दिनाङ्कात् केरळे थिरुअनन्तपुरम्-तः 'जयन्ती'-नामकं दैनिकं संस्कृत-वार्त्ता-पत्रं प्रकाश्य श्रीकोमल-मारुताचार्येण श्रीलक्ष्मीनन्द-स्वामिना च अभूतपूर्वं साहसं प्रदर्शितमासीत् किन्तु धनस्य ग्राहक-पाठकयोश्च अभाव-कारणात् संस्कृत-दैनिकस्य अस्य प्रकाशनं कतिपय-दिनाभ्यन्तरे एव पिधातुं विवशौ जातौ- श्रीकोमल-मारुताचार्यः श्रीलक्ष्मीनन्द-स्वामी च। कालान्तरे, कानपुरतोह्यपि कतिपय-मासार्थं 'सुप्रभातम्'-नामकं दैनिकं संस्कृत-वार्त्ता-पत्रं प्रकाशितं जातं किन्तु पाठक-ग्राहकयोः अभावात् एतदपि अवरुद्धम्।

संस्कृत-पत्रकारितायाः अधुनातनं स्वरूपम् -

संस्कृतं नाम भारतस्य सांस्कृतिकं रिक्थम् । एतद्देशस्य अभिज्ञानम्। भारतस्य अस्मिता। स्वतन्त्र-भारतस्य भाषा-सम्बद्धायाः नीतेः चक्रव्यूहमुपेक्ष्य पश्यामः चेत् अद्यत्वे संस्कृतपत्रकारितायाः क्षेत्रेह्यनारतं विधीयमान् विविधान् प्रयोगान् परीक्षामहे चेत्, नूनमेतत् प्रतिभाति यत् विश्वस्य अधिकाधिकाः भाषाः, अमुना वैज्ञानिकेन गणितात्मकेन पूर्णेन च वाणी-विज्ञानेन लाभान्विताः भवन्ति । Computational Linguistic Science-इति विज्ञान-जातं परिपोष- यितुं सम्वर्धयितुञ्च संस्कृतस्य शब्दानुशासनं समधिकं सहायकं जायते। प्रवर्तमाने एतादृशि परिदृश्ये केषाञ्चन विशिष्ट-कारणानां कारणात् मन्दतामापन्ना संस्कृत-पत्रकारिता, आधुनिक-सञ्चार-माध्यमानां सर्वविध-क्षेत्रेषु सामाजिक-सञ्चार-माध्यमेषु च स्वीयां समुपयोगितां प्रभावञ्च सुतरां प्रतिष्ठापयति।

संस्कृत-पत्रकारितायाः आधुनिक-युगं सुनिश्चेतुं यदि वयं एकविन्श-शताब्द्याः आरम्भ-कालं स्वीकुर्मश्चेत्, किञ्चित्-सिंहावलोकनं कृत्वा विन्श-शताब्द्याः अन्तिम-दशक-त्रये सञ्जातायाःसूचना-क्रान्तेः प्राविधिक-विकास-प्रक्रियायाः च समीक्षा व्यापक-परिधौ परिशीलनीया। अत्रभवन्तः सुधी-पाठकाः मम सङ्केतमवगतवन्तः इति मन्ये।

वैविध्य-समावेशिन्याः संस्कृत-पत्रकारितायाः विकास-शृंखला-क्रमे अपरैका ऐतिहासिकी घटना घटिता, नूनं सात्र समुल्लेखनीयास्ति । भारत-सरकारस्य सूचना-प्रसारण-मन्त्रालयेन आरम्भे प्रयोगात्मक-रूपेण 1974-तमे वर्षे जून-मासे 30-तमे दिनाङ्के प्रातः 9-वादने आकाशवाण्याः दिल्ली-केन्द्रात् राष्ट्रिय-प्रसारणत्वेन संस्कृत-वार्त्तानां पञ्च-मिनिटात्मकंप्रसारणमारभ्य ताः सर्वाः अपि भ्रान्तयोह्यपाकृताः, ते सर्वेह्यपि चापवादाः अपसारिताः यत् संस्कृतं नाम भाषित-भाषात्वेन व्यवहर्तुं नैव शक्यते वा प्राविधिकाः विचाराः संस्कृतेन अभिव्यञ्जयितुं नैव शक्यन्ते इति। अस्य राष्ट्रिय-संस्कृत-वार्त्ता-प्रसारणस्य लोकप्रियतां सर्वजन-ग्राह्यताञ्च आलक्ष्य कतिपय-मासानन्तरं अपरमेकं पञ्च-मिनिटात्मकं संस्कृत-वार्त्तानां राष्ट्रिय-प्रसारणं सायं दश-मिनिटधिक-षड्-वादनतः आरब्धम् । नैतावदेव, 1994-तमे वर्षे ओगष्ट-मासे 21-तमे दिनाङ्के रविवारे दूरदर्शनेन साप्ताहिकं संस्कृत-वार्ता-प्रसारणमारभ्यअभिनवं कीर्त्तिमानं प्रतिष्ठापितम् । ईश्वरानुग्रहेण दूरदर्शनात् प्रथमस्य साप्ताहिक-राष्ट्रिय-संस्कृत-वार्त्ता-प्रसारणस्य शुभावसरः आसां पङ्क्तीनां लेखकेन अवाप्तः । एतदनु, कतिपय-वर्षानन्तरं दूरदर्शनस्य साप्ताहिक-संस्कृत-वार्त्ता-प्रसारणमिदं पञ्च-मिनिटात्मका- वधये प्रतिदिनं प्रातः प्रसारयितुमारब्धम् । अतःसप्रमाणमिदं वक्तुं शक्यते यत् संस्कृत-पत्रकारिता वैविध्य-समावेशिनी सती सर्वदैव सर्वत्र च व्यराजत।

अस्मिन्नेव काल-खण्डे अपरैका ऐतिहासिकी घटना संवृत्ता यया संस्कृत-पत्रकारितायाः प्रवर्त्तमाना मन्दगतिः तीव्रतरा विहिता। संस्कृतानुरागिणः केचन समुत्साहिनो युवानः एतेषु दशकेषु संस्कृतं भाषित-भाषात्वेन प्रतिष्ठापयितुं संघटनात्मक-रूपेण सक्रियाः सन्तः राष्ट्रव्यापि-अभियानान्तर्गतं संस्कृत-प्रचार-कार्याणि कुर्वन्तः चासनम्, गच्छता कालेन एतानि प्रचार-कार्याणि साम्प्रतम् अन्ताराष्ट्रिय-स्तरे विधीयन्ते। कर्णाटके बंगलूरु-नगरे कार्यरतं 'हिन्दू-सेवा-प्रतिष्ठानम्', अधुनातनरूपेण च 'संस्कृत-भारती', 'लोकभाषा-प्रचार-समितिः' 'विश्व-संस्कृत-प्रतिष्ठानम्' प्रभृतीनि कानिचित् एतादृन्शि नामानि सन्ति, यैः पत्रकारितायाः अधुनातन-स्वरूपं व्यवस्थापयितुं व्यापकतरञ्च विधातुं महत्-योगदानमनुष्ठितम्, अपि च, प्रत्येकमपि संस्कृतानुरागी समाश्वासितोह्यस्ति यत् कालोह्ययं समुपागतः यदा न केवलं भारतीयाः, वैदेशिकाः अपि, धाराप्रवाहेण संस्कृतं भाषिष्यन्ते। अस्म्नेव शृंखला-क्रमे 'संस्कृत-भारती'1999-तमे वर्षे बंगलूरू-तः 'सम्भाषण-सन्देशः'

इति मासिक-पत्रिकां प्राकाशयत्। मासिक-पत्रिकैषा स्वीय-कलेवर-सज्जायाः, सरल-संस्कृत-भाषायाः विषय-वैविध्यस्य च कारणात् देशे विदेशेषु चातितरां लोकप्रिया प्रवर्त्तते । एवं हि प्रवर्तमानासु विविध-विषयिणीषु आसु पत्र-पत्रिकासु - संवित् [ पाक्षिकं पत्रम् ], संस्कृत-बाल-संवादः [ मासिकं पत्रम् ], गीर्वाणी [ मासिकं पत्रम् ], महास्विनी [ षाण्मासिकं पत्रम् ], आरण्यकम् [ षाण्मासिकं पत्रम् ], संस्कृत-सम्मेलनम् [ त्रैमासिकं पत्रम् ], अर्वाचीन-संस्कृतम् [ त्रैमासिकं पत्रम् ], आर्षज्योतिः [ मासिकं पत्रम् ], संस्कृत-प्रतिभा [ त्रैमासिकं पत्रम् ], संस्कृत-मञ्जरी [ त्रैमासिकं पत्रम् ], संस्कृत-वार्त्ता [ त्रैमासिकं पत्रम् ], संस्कृत-विमर्शः [ वार्षिकं पत्रम् ], अभिव्यक्ति-सौरभम् [ त्रैमासिकं पत्रम् ], अतुल्यभारतम् [ मासिकं पत्रम् ], संस्कृतवाणी [ पाक्षिकं पत्रम् ],संस्कृत-सम्वादः [ पाक्षिकं पत्रम् ],संस्कृत-रत्नाकरः [ मासिकं पत्रम्],दिशा-भारती [ त्रैमासिकं पत्रम् ],देव-सायुज्यम् [ त्रैमासिकं पत्रम् ],संस्कृत-वर्तमानपत्रम् [ दैनिकं पत्रम् ],विश्वस्य वृत्तान्तम् [ दैनिकं पत्रम् ],संस्कृत-साम्प्रतम् [ मासिकं पत्रम् ],निःश्रेयसम् [षाण्मासिकं पत्रम् ],श्रुतसागरः [ मासिकं पत्रम् ],सेतुबन्धः [ मासिकं पत्रम् ],हितसाधिका [पाक्षिकी पत्रिका],दिव्यज्योतिः [ मासिकं पत्रम् ],रावणेश्वर-काननम् [ मासिकं पत्रम् ],रसना [ मासिकं पत्रम् ],दूर्वा [ त्रैमासिकं पत्रम् ],नाट्यम् [ त्रैमासिकं पत्रम् ],सागरिका [ त्रैमासिकं पत्रम् ],ऋतम् [ द्विभाषिकं मासिकं पत्रम् ],स्रग्धरा [ मासिकं पत्रम्],अमृतभाषा [ साप्ताहिकं पत्रम् ],प्रियवाक् [ द्वैमासिकं पत्रम् ],दिग्दर्शिनी [ त्रैमासिकं पत्रम् ],वसुन्धरा [ त्रैमासिकं पत्रम् ],संस्कृत-मन्दाकिनी [ षाण्मासिकं पत्रम् ],लोकप्रज्ञा [ वार्षिकं पत्रम् ],लोकभाषा-सुश्रीः [ मासिकं पत्रम् ],लोकसंस्कृतम् [त्रैमासिकं पत्रम् ],विश्वसंस्कृतम् [ त्रैमासिकं पत्रम् ],स्वरमङ्गला [ त्रैमासिकं पत्रम् ],भारती [ मासिकं पत्रम् ],रचना-विमर्शः [ त्रैमासिकं पत्रम् ],सरस्वती-सौरभम् [ मासिकं पत्रम् ] संस्कृतश्रीः [ मासिकं पत्रम् ],वाक् [ पाक्षिकं पत्रम् ],अजस्रा [ त्रैमासिकं पत्रम् ],परिशीलनम् [ त्रैमासिकं पत्रम् ],प्रभातम् [ दैनिकं पत्रम् ],व्रजगन्धा [ त्रैमासिकं पत्रम् ],संगमनी [ त्रैमासिकं पत्रम् ],विश्वभाषा [ त्रैमासिकं पत्रम् ],भास्वती [ षाण्मासिकं पत्रम् ],कथासरित् [ षाण्मासिकं पत्रम् ],दृक् [ षाण्मासिकं पत्रम् ],वाकोवाकीयम्[ षाण्मासिकं पत्रम् ],वैदिक-ज्योतिः [षाण्मासिकं पत्रम् ], अभिषेचनम् [षाण्मासिकं पत्रम्], अभ्युदयः [षाण्मासिकं पत्रम्]सत्यानन्दम् [ मासिकं पत्रम् ],संस्कृत-साहित्य-परिषत्-पत्रिका [ त्रैमासिकं पत्रम् ] चेत्यादयः अन्यतमाः सन्ति। आभिः वैविध्य-समावेशिन्याः संस्कृत-पत्रकारितायाः क्षेत्रं समधिकं सक्रियं व्यापकतरञ्च विहितम्।

एतदतिरिच्य, ॥ industan Samachar- इति पृथग् एकंसंस्कृत-वार्त्तनाम् अभिकरणं [ न्यूज-एजेन्सी ] अपि प्रवर्त्तते। एते सर्वेह्यपि संस्कृत-पत्रकाराः संस्कृत-कर्मिणश्च हार्दिकाभिनन्दनेन मंगलकामनाभिश्च वर्धाप्यन्ते!

वैद्युदाणविक-युगे [ Electronic Era ] बहव्यः ई-पत्रिकाः अपि प्रकाश्यन्ते -एतासुप्राची प्रज्ञा [मासिकी ई-पत्रिका ], जान्हवी [ त्रैमासिकी ई-पत्रिका], संस्कृत-सर्जना [ त्रैमासिकी ई-पत्रिका]सम्प्रति वार्त्ताः [दैनिकं ई-पत्रम् ], अपि च, सम्प्रति वार्त्ताः-इति दैनिकं [ई-पत्रीय-दृश्यवार्त्ता-प्रसारणम्]चादयः प्रमुखाः सन्ति।

सुधी-पाठकाः वृत्तमेतत् विज्ञाय सुखदमाश्चर्यम् अनुभविष्यन्ति यत् विगत-वर्ष-त्रयाद [online-संस्कृत-radio ]www.divyavanee.in... -इतिनाम्ना संस्कृत-भाषिकान् विविधान् कार्यक्रमान् अहर्निशं प्रसारयति । पाण्डिचेरीस्थः श्री-ओरबिन्दो-आश्रमस्य समर्पित-विद्वान् डॉ.सम्पदानन्द-मिश्रः अस्य प्रसारणस्य प्रवर्तकः मार्गदर्शकश्च वर्त्तते।

राष्ट्रिय-संस्कृत-संस्थान-श्रीलाल-बहादुर-शास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठ-तुल्यानि संस्थानानि विश्वविद्यालयाश्च संस्कृत-पत्रकारितायाः पाठ्यक्रमान् आरभन्त। आशास्यते यत् कतिपय-कालानन्तरम् एतेभ्यः संस्थानेभ्यो निर्गताः प्रशिक्षिताः संस्कृतस्य पूर्णकालिकाः पत्रकाराः वार्त्ताहराश्च नूनं सक्रियाः भवितारः, अपि च, वैविध्य-समावेशिन्याः संस्कृत-पत्रकारितायाः कार्याणि प्रभावञ्च प्रवर्धयितारः।

विगत-वर्ष-द्वये केरळे चत्वारि लघु-चलचित्राणि संस्कृत-भाषया विनिर्मितानि, तानि च दर्शकैः अतितरां प्रशंसितानि। थिरुवनंतपुरम्-तः प्रचाल्यमाना मलयालम-भाषिका 'जनम्'-दृश्यवाहिनी 2015-तमे वर्षे ओक्टोबर-मासे द्वितीय-दिनाङ्कात् [ गान्धि-जयन्ती-तः ] नियतरूपेण प्रतिदिनं 15-मिनिटात्मकं संस्कृत-वार्त्ता-प्रसारणमारभत। विगत-वर्ष-द्वयात् दूरदर्शनतः प्रसार्यमाणः वार्त्तावलीति साप्ताहिकः संस्कृत-कार्यक्रमः सुतरां लोकप्रियतां भजते। एवं हि, विगत-वर्ष-पञ्चकात् आकाशवाण्याः इन्द्रप्रस्थ-वाहिकातः मासे द्विवारं [ प्रथमे तृतीये च शनिवासरे, रात्रौ सार्ध-नववादने ] प्रसार्यमाणः अर्ध-होरावधिकः । संस्कृत-सौरभम्' इति कार्यक्रमः श्रोतृभिः सुतरां स्पृह्यते । एतानि तथ्यानि परिभाव्य सविश्वासं वक्तुं शक्यते यत् वैविध्य-समावेशिन्याः संस्कृत-पत्रकारितायाः भविष्यत् सकारात्मकं समुज्ज्वलं चास्ति।

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

Girish Kumar Bansal, Manager
**Vidya Deep Public School**
(Govt. Recognised)
C-400/A, Main Market
Bhajan Pura, Delhi-110053
Mob.: +91-9555955591
+91-9810067099,+011-22563764

# उत्तरप्रदेशसंस्कृतसंस्थानेन वर्षद्वयस्य 2016–17 संस्कृतपुरस्काराः प्रदत्ताः

उत्तरप्रदेशसंस्कृतसंस्थानेन वर्षद्वयस्य 2016 2017 इत्यस्य संस्कृतपुरस्काराः प्रदत्ताः। पुरस्कारसमारोहः फरवरीमासस्यास्य सप्तमे दिनांके विधानसभामार्गस्थे लोकभवने समायोजितः। भारतवर्षस्य राज्यसूच्याम् उत्तरप्रदेशः प्रमुखो वर्तते संस्कृतपुरस्कारादिप्रदाने सुरभारतीप्रचारणे च। संस्थानं चात्र दर्शनीयमस्ति। यत् आवर्षं संस्कृतविकासाय प्रयतते। अवसरेऽस्मिन् पुरस्कारप्रदानसमारोहसुखमलभत। सर्वेभ्यः महामहिमकरकमलाभ्यां मुख्यमन्त्रिमहोदयानां पाणिपल्लवाभ्यां विद्वद्भ्यः सम्मानपत्रं प्रदत्तम्। प्रफुल्लवदना विद्वांसः पुरस्कारमवाप्य संस्कृतसंवर्धनाय संकल्पिता अदृश्यन्त।








समारोहमिमलमकुर्वन् महामहिमराज्यपाल रामनाइकमहोदयः मुख्यमन्त्री योगी आदित्यनाथा प्रभाताश्रममस्य गुरवः विश्वेश्वरानन्दमहोदयाः। संस्थानेन विश्वभारती– वाल्मीकि–व्यास–नारद–विशिष्टपुरस्काराः, विशिष्ट–नामित–विशेष– विविधपुरस्काराः वेदपण्डितपुरस्काराश्च नवत्यधिकविद्वद्भ्यः प्रदत्ताः, येषां संस्कृतजगति स्वक्षेत्रे च महत्त्वपूर्णमस्ति स्थानम्। स्ववक्तव्यं श्रावयता संस्कृतप्रचाराय सर्वैरपि सर्वविधसहयोगाश्वासनं प्रदत्तम्। संस्कृतज्ञाः स्वकार्यं सम्यक् कुर्युरिति परामर्शोऽपि श्रावितः। संस्थानस्य अध्यक्षाः आचार्यवाचस्पतिमिश्रमहोदयाः धन्याः येषां सम्यक् निर्देशने संस्थानं सुचारूरूपेण कार्यं करोतीति सर्वैरपि प्रशंसनं कृतम्। संस्कृतज्ञाः स्वसन्ततिं संस्कृतं पाठयेयुरिति कांक्षितमतिथिभिः।

महान् विद्वत्संघो लोकभवने विराजमानः

# अयोध्यातः रामेश्वरपर्यन्त रामराज्य रथयात्रायाः आरम्भः

अयोध्या। कारसेवकपुरमतः रामेश्वरं पर्यन्तं रामराज्य रथमात्रायाः शुभारम्भो जातः। यात्रां विश्वहिन्दुपरिषदस्य अन्तराष्ट्रियमहासचिव चंपतरायः ध्वजातारेणं कृत्वा शुभारम्भो अकरोत्। इयं षष्ठ राज्यतः भ्रमित्वा 41 दिवसस्य यात्रा समाप्य रामनवम्या अवसरे रामेश्वर गमिष्यति। तत्र पद्मनाभ मंदिरस्य समक्षे रामराज्य सम्मेलनस्य माध्यमेन यात्रातः सम्बन्धित कचनं उपस्थापयति। श्रीरामदासमिशन युनिवर्सल सोसाईटि पक्षतः संयोजित रथयात्रायाः पञ्च उद्येश्यमस्ति। रामराज्यस्य स्थापना, रामजन्मभूमेः भव्य मन्दिरस्य निर्माणाम्, रामायणं पाठ्यक्रमे अध्यापनम्, रविवारस्य स्थाने गुरुवासरं साप्ताहिक अवकाश एवं वर्षे एकं दिनं विश्वहिन्दूदिवसस्य घोषणा इत्यादि सम्मिलितोऽस्ति।



रथयात्रायाः संचालक स्व याचनायाः समर्थने 10 लक्ष्याधिक जनानां हस्ताक्षरमपि एकत्रं करिष्यन्ति एवं राष्ट्रपतिं प्रदास्यन्ति। रामराज्य यात्रा आरम्भ करणाय कारसेवकपुरमें बहुसंख्यक भाजपानेता विश्वहिन्दुपरिषदस्य कार्यकर्ता एवं संत आसन्। एषु सांसद लल्लुसिंह, महापौर ऋषिकेशउपाध्याय, पार्षद पुजारीरमेशदास एवं अनुजदास, मुगलसम्राट् बहादुरशाहजफरस्य वंशज प्रिंस याकूबहबीबुद्दीनतुगी, हिन्दुमहासभायाः राष्ट्रिय प्रवक्ता मनीषपाण्डेय उपस्थिताः आसन्।

कारसेवकपुरमतः रामराज्य रथयात्रा आरम्भात्पूर्वं संतसम्मेलनस्य आयोजनमभवत्। सम्मेलने मंदिरनिर्माणस्य घोषणा अभवत्।

# ग्राम, गौ एवं गंगा सर्वोत्तम अर्थव्यवस्थायाः आधरोऽस्ति–योगीआदित्यानाथ

मथुरा। मुख्यमंत्री योगीआदित्यनाथ उक्तवान यत् ग्राम, गौ एवं गंगा राष्ट्रिय अर्थव्यवस्थायाः आधारोऽस्ति। अस्य संरक्षणं विना राष्ट्र कदापि संरक्षितो न भविष्यति। सर्वकारः गौ–तस्करी इत्यस्योपरि प्रतिबन्ध कृत्वा गौ संरक्षणं कृतवान। इदानीं गौ संवर्धनाय समाजं अग्रे आगमनीयम्। ते बेटरिनरी विश्वविद्यालये माध्यमेन गो आधारित अर्थव्यवस्था विकसित करणाय आवश्यकता विषये उक्तवन्तः। मुख्यमंत्री उक्तवान् यत् प्रत्येकस्मिन् मण्डले एवं विकासखण्डे गोशाला विकसित केन्द्रस्य स्थापना भविष्यति।



प्रत्येकं कृषकं भारतीयवंशस्य द्वौ गौ प्रदास्यन्ति। ते पंचगव्य, गोमल एवं गो मुत्रे पृथक् शोध विषये उक्तवन्तः। अस्मिन्नवसरे राज्यपाल रामनाइंक एवं मुख्यमंत्रीयोगी विश्वविद्यालय परिसरे स्थित पंडित दीनदयालउपाध्यायस्य प्रतिमाया अनावरणमपि कृतवान। राजयपाल रामनाईक उक्तवान यत् पंडित महोदयस्य प्रदत्त राजनैतिक विचारे एवं अद्य केन्द्र एवं बहुषु प्रदेशेषु सर्वकारः प्रचलति। परञ्च पंडितमहोदयस्य मृत्योः रहस्यम् इदानीमपि अनुत्तरितोऽस्ति। ते अन्त्योदयस्य उदयाय सर्व रोजगार एवं क्षेत्रिय जलम इत्यस्मिन् विषये उक्तवन्तः।

**पाठकानां कृते सूचनाः–**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्–**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

**अस्माकं प्रेरणास्त्रोतः– स्व.पं० रामकिशोरशर्मा,**
**परामर्शकाः–डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दतिवारीः**
**सम्पादिका–मञ्जूशर्मा, उपसम्पादकः– डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ– वेदप्रकाशशर्मा, नेहाशर्मा च,**

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः *sanskritsamvad@gmail.com,* *RNI No. : DELSAN/2011/38660* *DL(E)-21/5379/2014-16* राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।